CC-0. Digitized by eGangotri and MIDF- Delhi

प्रमात्व विचार



सम्पादको व्याख्याकारश्च

प्राध्यापक- डॉ. गोविन्द चौधरी

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

।। श्रीः ।।

प्रमात्व विचार

सम्पादको व्याख्याकारश्च

प्राध्यापक- डॉ. गोविन्द चौधरी

(विद्यावारिधि) प्र. श्रेणी, “आत्मतत्त्व विश्लेषणम्” पौरसत्य पाश्चाह्व पथेन”

श्री.पू.म.वाट प्राप्त- स्वर्णपदक (विद्यापति वनौली, जनकपुर धामस्थः

“तिथि-२०२९ ई.” माघे- ६- फरवरी,

“स्वतो ग्राह्यत्वम्” प्रमात्वम्” (प्रमात्व विचारः)

चौखम्बा संस्कृत पुस्तकालय

वाराणसी

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशक:

चौखम्बा संस्कृत पुस्तकालय

पत्रमञ्जूषा-संख्या १०९१

सी.वो. २८/१५, ज्ञानवापी, चौक

वाराणसी- २२१००१ (भारत)

@ लेखक :

प्रथम संस्करण: सन् २०२१ ई.

विक्रम सम्बत् २०७८

मूल्य: ३५०.००

मूद्रक: **चौखम्बा प्रेस**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

'श्री गणेशायनमः''

भूमिका

प्रगात्वं न स्वतो ग्राह्य मिति प्रतिपादयंता न्याय शास्त्रीयस्फुट निबन्धानां श्रीमतां प्रकाशितानां न्याय वैशेषिक प्रमुख ग्रन्थानां गम्भीरावगाहिनी दृष्टिः विद्यत् एवेतिप्रत्यक्षासिद्धैवाऽऽस्ते । अस्य न्याय दृढस्येश्वरात्म वादात्मकौ प्रबन्धौ विरचितौप्रकाशं च नीतौ। दूटश्चामुद्रितानां ग्रन्थानी सग्रहे पाठोद्धारे पाठविचारे प्रकाशन विद्यौचाग्रहातिशयः ।

यस्य फलं गौतम सूत्र प्रकाशस्य न्यायतत्वालोकस्य साध सम्पादनं परिशिष्टादिभिरलंकृत्यप्रकाशनं च न्यायशास्त्ररसिकानां कृते ।

स्मर्यते चैतस्य शास्त्र ग्रहणनिष्ठा तद्विद्यसम्भाषा च यत्र कुत्रापि काश्यां वा कठोरः परिश्रमः प्रकाशनविधावपि स्वीकर्तव्य एवेति निश्चयं प्रतीमः।

अनेनैपथा प्राचीनाचार्येषुप्रधानोदयनः आचार्योद्भावितं संसारस्यकुर्तः साधकं प्रमाण साधकं युक्तिजालमष्टामि हेंतुर्मि परिपोषयति ।

कार्य योजन धृत्यादेः पदात्प्रत्ययतः श्रुतेः ।
वाक्यात् संख्याविशेषाच्च साध्यो विदव्ययः ।।

(न्याय कुसुमाञ्जलि)

अथच क्षित्यादिब्रह्माण्ड पर्यन्तं साक्षात्यपरंपरया पतन प्रतिबन्ध कतया पुरुषेणाधिष्ठितमस्ति। यथा वियति विहङ्गमेनाधिष्ठितं सर्वं तिष्ठन् चकासते। यथा वियति विहङ्गमेनाधिष्ठितं सर्वं तिष्ठन् चकासते ।एव मन्यत्रायिश्रीमान् मणिकारः तत्त्वचिन्तामणै साक्षात्मणिरिवलोचन गोचरणं प्रयाति प्रमाणतत्त्वम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न्यायशास्त्रानुशीलन तत्पराणां प्रस्तुतो ग्रन्थः तत्त्वचिन्तामणिः मणिरिव प्रतिभाति। न्यायशास्त्र संबद्धानी निबन्धतत्त्वानां सिद्धान्तानां मीमांसकराद्धान्त निषेध मुखेन सिद्धान्त लक्षण विधिनिषेधाभ्यां तथाऽनवच्छेदकत्व विचार चर्चामालक्ष्य मणिसम्मत लक्षणानुयोगस्य प्रधान्यतया व्याख्यानम् चष्ट। अतएवोक्तिः यत्- उदयति दिशि भानौ भानुमान् सैव पूर्वादि वचनं दृष्टि गोचरतां समम्यु पैति ।

नहि कश्चिद् विपरीत लेखनं युर्क्ति वलाद् वस्तुसिद्धौमणि मतान्यपाकृत्य पक्षधगंगेशादि विचार मन्थनं संजात कमल कोमलं विचार तत्त्वमत मुञ्ज्वलयां बभूवु रिति दृष्टमेवेति सत्यं प्रतिभाति ।

परन्तु विषयनिर्षचनसूक्ष्मत्वे प्रवेशस्य प्राधान्यं क्रोड़पत्राणां निर्माणस्य व्युत्यादन मपि लोचन गोचरायते । सत्यपि नव्यन्याय प्रचार बाहुल्ये प्राचीन न्यायस्य सिद्धान्तानां सरंक्षण प्रसारयोर्विदुषां जागरुकता नयन यथातिथि र्भवति ।

अतएव वर्धमानोपाध्यायः चिन्तामणिकृतः गङ्गेशोपा ध्यायस्यौरस; अन्वीक्षानयतत्त्ववोध नाम्नीं व्याख्यां प्रणैखीत् । सूत्राशय प्रकाशन चतुरः प्रासंगिकत्वेनैव नव्यमतं संयोज्य स प्रसंगत्वेन न्यायदर्शन प्रमुख सिद्धान्तलक्षण ग्रन्थ व्युत्यादनं व्याचयदिति संक्षेपः ।

स्वेतोग्राह्यं स्यात् ज्ञानस्य तदा अनभ्यास दशापन्ने ज्ञाने प्रमाण्य संशय एवं नस्यात् । यदि तत्र ज्ञानं ज्ञातं तदात्वन्मते प्रामाण्यं ज्ञातभेवेति कथं सैशयः। यदि ज्ञानं नैव ज्ञातं तर्हि धर्मि ज्ञानाभावात् कथं संशयः तस्माद् ज्ञाने प्राभाण्य मनुभेयमेव । तथा इदं ज्ञानं प्रभा संवादि प्रवृत्ति जनक त्वात् । यन्नैवं तन्नैवं यथाऽप्रभा। इदं पृथिवीत्वप्रकारकं ज्ञानं प्रभा गन्धवति पृथिवीत्व प्रकारक ज्ञानत्वात् । न हेतुज्ञानं कथं स्यादिति वाच्यम् , पृथिवीत्व प्रकारकत्वस्यस्वतो ग्राह्यत्वात् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्प्रकार कत्वावच्छिन्न तद् वद् विशेष्य कत्वं परं न स्यादिति संशयानुरोधात् ।

न च तथापि समेषां ज्ञानानां यथार्थत्वात् प्रमालक्षणे तद् वद् विशेष्यकत्वं विशेषणं व्यर्थ मेपेति सत्य मिति वाच्यम् । दोषाधीनस्य पुरोवर्तिनि स्वतन्त्रोयस्थित रजत मेदा ग्रहस्य हेतुत्वादिति। शम् ।अलमिति विस्तारेण।

●

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषयानुक्रमणिका

१. न्यासगते परत्व व्यवस्थापनम्

२. रजतो ग्राह्यत्व व्यवस्थापनम्

३. अनुमामेन व्यवस्थापनम्

४. अनभ्यास दशायां व्यवस्थापनम्

५. कुमारिल दिशा तन्निरुपणम्

६. यथार्थानुभवनिरुपणम्

७. ज्ञान प्रामाण्य व्यवस्थापनम्

८. गुरुमते व्यवसय:

९. माहमते तन्निरूपयाम्

१०. मिश्रमते तन्निरूपणान्

११. ज्ञान पदस्यौचित्यम्

१२. प्रभाकर विचारे तस्यौचित्यम्

१३. मीमांसकमते तन्निरूपपणम्

१४. सिद्धसाधन निराकरण विचार

१५. यावत् पदस्यौचित्यम्

१६. गुरुमतेतत् प्रदर्शनम्

१७. भाट्टानां विचार प्रदर्शनम्

१८. गुरुप्रभाकर विचारे वैषम्य व्यवस्थायनम्

१९. वस्तुतस्तु विचारोपपादनम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

२०. मुरारिमिश्राणविचार वैषम्यम्
२१. तत्र सिद्धान्त पक्षः
२२. मिश्र विचार वैशिठस्यम्
२३. स्वतोग्राह्यले दोष प्रर्दशनम्
२४. न्याय सिद्धान्त प्रतिपादनम्
२५. तन्मतो संशमीपपादनम्
२६. महंमत निराकरणम्
२७. तत्र ज्ञाने प्रामाणमीयोय पादनम्
२८. प्रभाकर विचारे ज्ञान मात्रस्य याथार्थ्यंश
२९. ज्ञान मात्रस्य प्रामाणयम्
३०. तत्रानुमांनरम निरूपणम्
३१. अनुमानस्य वैविध्यम्
३२. मर्तिककि दृष्टान्त प्रदर्शनम्
३३. ज्ञाने प्रमाणयानुमानम्
३४. प्रमाल प्रसद्धि व्युत् यादनम्
३५. तत्रानुमानस्य वैविध्यम्
३६. प्रभात्वस्य स्वतोग्राहमत्वम्
३७. ज्ञाने प्रामाण्यानुमान् प्रकारः
३८. स्वतोग्राह्यत्वे सिद्धान्तत्व घुत्वपादमम्
३९. प्रभात्व लक्षणे तद् विशेषणस्य वैयथ्यम्
४०. तत्र रजत भेदाग्रहो पपादनम्
४१. अन्यथासयाति निरुपणम्
४२. तत्र भिन्न विचार प्रदर्शनम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

४३. अन्यथा ख्यातौ प्रमाणम्

४४. तत्र विभिन्न विचारोपपादनम्

४५. अन्यथातौ विभिन्न विचारः

४६. न्याय मते सिद्धान्त व्यवस्थायनम्

४७. अन्यता ख्यतौभिन्न विचारः

४८. मणिकारस्य वैशिष्स्यम्

४९. अन्यथाख्याति निरूपणौचित्यम्

५०. मिश्र विचारस्यौचित्यम्

५१. तत्रोयाध्याय सिद्धान्त पक्षः

५२. शिरोमणि विचार प्रदर्शनम्

५३. मीमांसकांना प्रस्थान भेदः

५४. उपसंहारः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

।।श्रीः।।

ज्ञानविज्ञानविनिवृत्तितापत्रयाशेषविचारनिदानमनुसन्दधाना:विवेकिनः-सर्वदासंहितास्मृतीतिहासपुराणवचनानिसमाकलय्यतत्रत्मतत्त्वसाक्षारकारमेव प्राधान्येन तदुपायमाकलयाम्बमूवुः ।

तदासादनसाधनं जिज्ञासमानाः परमकरुणारसाप्लावितं विचार हिमकण गौतमसूत्रमुपसेदुः । यदार्थ संजातवास्तविकज्ञान राशिः समेषां पदार्थानां साधर्म्यवैधर्म्याभ्यां समासादितात्मतत्त्वसाक्षात्कारएवंपरमः पन्याः वरीवृतीति। अतएवश्रोतव्योमन्तव्योनिदिध्यासितव्यश्चेतिस्मर्तव्य एवेति निश्चयः। ज्ञानविज्ञानपरवोऽनसूयकाःघीधनेशाः मंगलवचनमेवोपसेदुः। अतएव संहितादितन्त्र पुराणादिसाहित्येषु सदाचारपरम्परा परिप्राप्तमङ्गल वचनानि नितान्त मासादयन्ति मनीषिणः । तथा च संग च्छतेर्मगलवचनम्-

ओङ्कारश्चायशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भीत्या विनिर्यातौ तेन माङ्गलिकाबुभौ ।।

युक्तश्चैतत् । कथमन्यथासदाचारपरम्परापरिप्राप्तकर्तव्यताकस्य मङ्गलस्यापिफलदर्शनात् तादृशानुष्ठानं नव्यन्यायशास्त्रं प्रणयतो महामुनेः गौतमस्याचारेणैव विज्ञायते, महता श्रीमता आचार्येण शङ्करमिश्रेण वैशिेषिक सूत्रोयस्कारे। तथैवोक्तम् ।

विहित मंगलस्यापि फलादर्शनात् तथा कृतमंगल्स्यापि फलदर्शनात्, तादृशानुष्ठानं प्रेक्षावान् विद्धात्येव । शिष्टाचारानुमित श्रुतिवोधितकर्तव्यताकस्याऽपाततः फलादर्शनमात्रेणाकरणत्वशङ्का नैव जागर्ति । तदुक्तं विदुषायत्—

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रौतात् साङ्गात् कर्मणः फलावश्यं भावनियमात् । अतएव कल्पितमयिकारणं कारणमेव फलानन्तर्य नियमस्यैव वैदिककारण कलायात्।

प्रारब्धपरिसमाप्तिप्रतिबन्धकदुरितध्वंसत्वेनफलत्वे समाप्तेरेवफल-त्वौचित्यात् । तत्रापि च हिरण्यदानप्रयागादिस्नानजन्यत्वेन व्यमिचारशङ्का कलंकापनोदन संजाततया व्यभिचारङ्कावसरः नैव समुपसर्पति । अतएव विश्वनाथ पञ्चाननोपि तमेव पन्थानं मनुसृत्य ताद्रूप्येणैव स्व विचारसरणि प्रणैषीत् । तद्वचनादाम्नायस्य प्रामाण्यमिति वचनेनैव विज्ञायते मनीषिणा । ग़ौतमीय सूत्रेऽपि- तद् प्रामाण्यमनृतव्याघातपुनरुक्त दोषेभ्यः'' तच्छब्देनानुपक्रान्तोऽपि वेदः परामृश्यते । तथा च तादृशवचनात् तेनेश्वरेण प्रणयनादाम्ना यस्य वेदस्य प्रामाण्यं सर्वदा संगच्छत एवेति। अतएव- धर्म विशेष प्रसूताद द्रव्यगुण कर्म सामान्य विशेष समवायानां पदार्थानां साधर्म्य वैधर्म्याभ्यां तत्त्वज्ञानान्निश्रेयसम्'' एतादशं तत्त्वज्ञानं न्याय वैशेषिक शास्त्राधीन मिति तस्यापि निःश्रेयस हेतुत्वं दण्डपूयायित मेव । अतः न्यायपैशेषिकाभ्यां सुसम्मतं प्रमात्वं संशयानुपपत्तितः स्वत्तोनग्राह्यमिति संप्राप्ते नितान्तमवसरे प्रतिपादितं ग्रन्थ स्वतो नग्राह्यमिति संप्राप्ते नितान्तमवसरे प्रतिपादितं ग्रन्थ कारेणेति विज्ञेयं प्रामाणिकैः। अतएव वचन मिदं प्रत्यपीपदन्- गंगेशोपाध्यायाः किल—

यस्तर्कतन्त्रशतपत्रसहस्ररश्मिः गंगेश्वरः सुकविकैरवकाननेन्दुः'' इत्यादिवचसा विज्ञायते तार्किकप्रवरेणन्यायविद्यायाः सर्वदा नितान्तमाधारमूलकत्वं तेषा मुद्याध्यायानाम् । न्यायतत्त्व चिन्तामणि ग्रन्थरत्नं सर्वविध्याधारस्तम्भमूलकत्वेन सकल विप्याप्रकाशकत्वेन च दर्शन जगती तले शास्त्रान्तरेच महतींख्यातिमप्राप्नोत् । प्रदीपः सर्वविद्यानां वचनेनै वावगम्यते तार्किकशिरोमणिना न्यायमणिना रघुनाथेन ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न्यायतत्त्वज्ञानजन्यवैराग्यैश्वर्य सम्पन्नानां मौलत्वेनसमम्यधायि तीर्थ चरणैः मनीषिप्रवरैः। सदाम्नायस्य संहिता रत्नस्य सर्वतो भावेन प्रामण्यमिति वचनं कालत्रयेषु संगच्छतएवेतिनिश्चप्रचम् ।

नित्यविज्ञानमानन्दं ब्रह्म'' इति श्रुतिवाक्यस्य ज्ञानवत्त्वानन्दवत्त्व प्रतिपादकत्वेन तत्साक्षाताकारकत्वेन च निरुपप्लवा चित्सन्तति वाक्येनैव मोक्षपदार्थस्य परंपुरुषार्थत्वेनैव प्रतिपादनात्, तेषां तद् वत्त्वसिद्धिः समुप जायते ।

अतएव तद्वद् विशेष्यकत्वेसतितत्प्रकारकं ज्ञानं प्रमेति लक्षणं व्यवहरति प्रामाणिकः। रजते इदं रजतमित्याकारके ज्ञाने रजततत्त्वद्ध विशेष्यकत्वेसतिरजतत्त्वप्रकारकत्वाल्लक्षणसमन्यवयः। एवंरजतत्त्व विशेख्याकत्वाभावन्नातिव्याप्ति शंकारसरः समुपसर्यति । नन्वत्र रंग रजत योरिमे रजत रंगे भ्रमात्मकेज्ञाने तथातिव्याप्तिः समागच्छति। जायमान दोषकलंकनिश्चयस्य प्रमाणप्रतीतिप्रत्ययवलादेवीतिव्याप्तिदोषस्य जायमानत्वमेवेति निश्चयस्य ध्रौव्यमिति धीमतां राद्धान्तः।

अतएवात्र रजतत्त्ववद्रङ्गविशेष्यकत्वरजतत्त्वप्रकारकत्वयोः विद्यामानत्वेनातिव्याप्तिदोषस्य निश्चयात्।

तद्वन्निष्ठविशेष्यतानिरुपिता या तन्निष्ठा प्रकारतानिरुपित विषयत्वस्य तादृशज्ञानपर्यन्तविवक्षणीयत्वेन नावकाशः पूर्वोक्तशंकाकलंकदोषस्येति निश्चयं प्रतीमः।

वास्तविकंतु विशिष्टवैशिष्स्यानुभवे विशेषणतावच्छेदक प्रकारकानुभवस्य शास्त्रसम्मतकारणस्य निर्देशतया तादृशोपयिक व्यवहार जनकत्वेन च तादशजन्यतावच्छेदकप्रविष्टत्वेन तत्प्रकारकत्वानुभवत्व-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जातित्वे सत्यपि तज्ज्ञानत्वस्यानुभवत्याघटकत्वात् न तादृशानुभवत्वस्य वैयर्थ्यं प्रतीति प्रत्ययाभ्यां प्रतिपन्नमित्यत्र नास्ति बुधानां वैमत्यमित्यत्र विवादावसरः सामायाति।

यद्यप्यत्र स्मृतिभिन्नज्ञानत्वात्मकानुभवत्वस्य तथा प्रतिपादने वैयर्थ्यं समुपयादयति कोपि प्राज्ञिकः, परन्तु सत्यमेतत्, तथापि तादृश कदाचिदपि श्यामत्वेन प्रतीयमानतयातथा समुपस्थितस्य प्रमात्वाद्यघटस्यत्वेन तस्याः प्रतीतेः कुतः प्रामाण्यं समागच्छेदिति तार्किकाणां विमर्शः

किमप्यत्रेदं वास्तविकतत्त्वं वक्तुं समुपक्रमते कोपियत् प्रमानुमवजन्य स्मरणस्य याथार्थ्येऽपि—

यथार्थानुभवकरणत्वमेव प्रमाण पदार्थ इत्यात्मकस्य स्मृतिकरणेऽप्रवृत्ते र्नोक्तापत्तिरिति तात्पर्यमनुसृत्य मूलोक्त प्रमालक्षणसम्बन्धविशेषाघटित्त्वेन संयोगेन घटकपालमितिभ्रमे अतिव्याप्तिशंकापनोदन व्याजमुखेन तन्निरासा व्याख्यान क्रमेण वचनमिदं प्रास्तौत् ग्रन्थकारः।

समवायेन घटवत् कपालमिति विशेष्यक घटनिष्ठ प्रकारताकत्वस्य तत्र वर्तमानत्वेन तादृशशंकांपरिहर्तुं सम्बन्धघटित्त्वेन तादृशं लक्षणं निर्वक्ति—

यथा च यादृश सम्बन्धावच्छिन्न यद्धर्मनिष्ठ विशेष्यता निरूपित यत् सम्बन्धावच्छिन्न प्रकारतानिरूपित तादृश ज्ञानशालित्वं प्रमात्वमिति तार्किक निवेहेन काथितमिति । अतएव संयोगेन कयाले घटवत्ताभ्रमेऽपिना तिव्याप्तिशकावसरः समायाति ।

किमप्यन्यदेवतात्पर्यं व्याख्यातुं बद्धपरिकराः सन्तिष्ठन्ते केचन जरन्नैसायिकाः यत् किल रंग रजतयोः- इमें रजतरंगे समुत्पन्न भ्रमे तावदति व्याप्ति दोष ग्रस्तत्वेन कथं तर्हि पूर्वोक्तलक्षणस्य निर्दुष्टत्वं गच्छेत् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यतोहिरजतत्ववद् रंग विशेष्यकत्वरजतत्वप्रकारकत्वयो: वर्तमानत्वेनाति-व्याप्ति:। अतएवात्र तद्वन्निष्ठविशेष्यतानिरूपितप्रकारताशलिज्ञानत्वस्य विवक्षणीयत्वेनैव दोषावकाशस्यावकाश:दृष्टि पथे समम्युयैति।

परन्तु तदुक्तसमूहावलम्बने रजतत्वनिष्ठप्रकारत्वस्यरङ्गवन्निष्ठ विशेष्यतानिरूपितत्ववशादेव नाम्युपैतिदोषावकाश:

अतएव तन्निष्ठविशेष्यतानिरूपितत्वाभावान्नातिव्याप्ति शंका प्रभवति। तत्रापि तादृशेच्छायामतिव्याप्तिनिरासायाज्ञानत्वनिवेशस्यावश्यकत्वं-दरीदृश्यत एवेति-गुरुचरणानां विचार प्रवाह:।

नन्वत्र पृथिवी जलोमयंगन्धवदित्याकारकप्रमायामव्याप्तिदोष: स्यादेवेतिचेन्न। तादृशाधिकरणतावच्छेदकघर्मावच्छिन्नतादृशविशेष्यता निरूपित तन्निष्ठप्रकारताकत्वस्यनिवेशेनादोषात्।

तथापि निरवच्छिन्न विशेष्यता विशेष्ट घट इत्याकारक प्रमायामव्याप्ति: स्यादेवेति सत्त्यम्। किन्तु—

तदधिकरणतानवच्छेदकानवच्छिन्न तद्वनिष्ठविशेष्यतानिरूपित तन्निष्ठप्रकारवाकत्वस्यप्रवेशबैलक्षण्येन नावकाश:शंका कलंकास्यदविचार प्रवाहस्य। अतएव तादृशलक्षणस्यौचित्यं बृद्धानां विचारे शाश्वतिकमेवेति साधीयान् पक्ष: प्रतिभाति।

तदवन्निष्ठविशेष्यत्वं च-

तत्प्रतियोगिकसम्बन्यानुयोगिनिष्ठविशेष्यत्वं कन्थनीयमेवेति। अन्यथा वृत्यनियामकाधेयत्वतादात्म्यादिसम्बन्धानच्छिन्नप्रमायां द्रव्ये द्रव्यत्वम्, घटो द्रव्यम् इत्यादि स्थले नितान्तं तथाव्याप्तिदोषमिथ्यापवाददोष: समाच्छन्नमेवेति विचारप्रवाहस्यौत्सर्गिकत्वं समायतत्येवेति विदुषां विचार

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रवाहः सर्वदा समापतत्येतिगिरीयान् पक्षः-समुल्लसति ।

अतः पूर्वोक्तविचारक्रम मर्यादया तादृश यथार्थानुभव जन्य स्मरणस्य यथार्थत्वेऽपि यथार्थानुभवकरणत्वमेवप्रमाणत्वमितिलक्षणस्यस्मृति करणेऽप्रवृत्तेर्नोक्तायत्तिःस्यादिति नितरामवधेयम्। यद्धर्मावच्छिन्न यत्सम्बन्धावच्छिन्नप्रतियोगिताकाभाववनिष्ठविशेष्यतानिरूपिततादृश सम्बन्ध्वावच्छिन्नप्रकारता शालित्वम्।

अतएवाधुनापूर्वोक्ततादृशप्रमात्वस्यन्यायसिद्धान्तसिद्धपरतोग्राह्यत्वव्यवस्थासम्पादनाय मीमांसकविचारसिद्धंस्वतो ग्राह्यं प्रमात्वं निषेधमुखेन निरूपयितुं समुपक्रूमतेमूले प्रमात्वमिति।

ज्ञाननिष्ठप्रमात्वस्यतदविशेष्यकत्वावच्छिन्नतत्प्रकारकत्वस्य स्वस्मात् ज्ञानात् न कदाचिदपि ग्राह्यम्, किन्तु परतोग्राहयम्। अनेन विज्ञातं भवति यदनुमनादिना ग्राहयमेव। स्वतोग्रा ह्यत्वेसंशयानुपपत्तिः स्यादेवेति निश्चयः।

यद्यत्र प्रामाण्यं कोप्याचार्यः स्वतोग्राह्यं स्वीकुरुते तदा ऽनभ्यास दशायां दूरेण समवलोकिते सति जल ज्ञानं प्रमानवेति नानुभव सिद्धः प्रमात्व संशयो नोपपद्येत। कर्थतु अनुव्यवसायेन प्रमाणस्य निश्चयात्। अतएव ज्ञानष्ठिं प्रामाण्यं सर्वदानुमेयमेवेति विदुषां राद्धान्तः।

यद्यपि विभाग मर्यादया प्रथमं तावदप्रामाण्यस्य परतोग्राहयत्व सिद्धान्त व्यवस्थापनमेवसर्वदोचितमेष प्रतिभाति; तथापि प्रभाकरमवेऽप्रमात्वस्य सुसंभ्रमतया स्वतोग्राह्यत्वंप्रतिपादयितुं समुद्यतोभवति मूलकारः।

प्रभाकरगुरुणां विचारे ज्ञानवृत्तित्वविशिष्टंतदवति तत्प्रकारकत्वं प्रभात्वम्। स्वतोग्राह्यत्वं तदप्रामाण्याग्राहकज्ञानग्राहक यावत् सामग्रीजन्य ग्रहविषयत्वमेवेति साधीयान् विचारः प्रतिभाति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रयाणां मीमासकानां मध्ये प्रभाकर गुरुणां विचारे तु समस्त ज्ञान स्यस्वाभिन्नज्ञानस्य विषयस्यावश्यकत्वेन तत्प्रामाण्यस्य ज्ञानान्तरग्राह्यत्वे तादृश ज्ञान सम्यादनाय पुनः ज्ञानान्तर मयेक्षते। ज्ञानस्य स्वप्रकाशरूपत्वात्। तज्ज्ञानस्य प्रामाण्यं तेनैव गृह्यते। ज्ञानवृत्तित्वविशष्टिं च तद् विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वात्मकप्रमाण्यमेव।

वास्तविकंतु तद्विशिष्टे तत्प्रकारकत्व विशिष्ट ज्ञानस्य तदमिन्नार्थ ज्ञान मेदेन भिन्नतया कस्मिन्नपि प्रामाण्ये यावत् ज्ञानग्राहक सामग्री ग्राह्यत्वात्मकं साध्यमङ्गीकर्तुं नैव कोपि क्षमते। परन्तु तादृश धर्म प्रकारक ज्ञान ग्राहक यावत् सामग्री ग्राह्यत्वस्यैव साध्यत्वेनैव स्वीकार्यः, किन्तु यद्धर्मनिष्ठ प्रकारकत्व विशिष्ट ज्ञाननिष्ठ प्रमाण्यं प्रमाणप्रत्ययसुसम्मततया तद्धर्म प्रकारक ज्ञान ग्राहक यावत् सामग्री ग्राह्यात्मकस्य साध्यत्वेनैव स्वीकर्तुंश क्यमेवेति समेषां विचारः युक्त्वा संसिद्धएवेति विचार सिद्धः।

अतएवं यद्धर्म प्रकारक ज्ञान प्रामाण्यं प्रामाण्येन सिद्धः। तथा च तादृश पक्षस्य स्वीकारे तद्धर्मप्रकारक ज्ञानग्राहकयावद्ग्रहयं साध्यत्वेन विवक्षणीयम्। तथा च ज्ञानपदस्य साध्यघटकघटत्वादि प्रकारक ज्ञान परकत्वनैव ज्ञानपदस्य तात्पर्यमवसेयमिति विद्वद्भिः। तादृशंप्रमात्वं तेनैव समूहालम्बनात्मकेन घटोयमिति तथा घटत्वेन घटमहं जानामित्यनुव्यवसा येनैव विषयी क्रियते विदुषा सर्वसम्मतत्वेनैव।

हेतुनामुना स्वप्रकाशरूपत्वेन तज्ज्ञान प्रमाण्यं तेनैव समूहालम्बनात्मकेनैव विषयी क्रियते।

अत्रेदंतात्पर्यं विज्ञायते यत् तर्कतत्त्व विदा यत् कस्यस्यायिज्ञानस्य परकीय प्रकाशनापेक्षत्वेन स्वकीयस्यैव प्रकाशस्यावश्यकत्वं ते स्वप्रकाशवादिनः स्वीकुर्वते स्वप्रकाशरूपत्वे नैव। एवं च तत्र प्रकाशान्तर

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मनपेक्ष्य तादृश ज्ञानस्य प्रामाण्यं तेनैव विभिन्न ज्ञान विषय कत्वेनैव विषयी क्रियते। तत्रपरकीयप्रकाशस्यावश्यकत्वं नाङ्गीकुरुते प्रभाकर:। कर्थतु तेषां विचारे ज्ञानवृत्तित्व विशिष्टमेव प्रमात्वं बोध्यम्। तथा च प्रमात्वं- तदवति तत्प्रकारकानुभवो यथार्थ:। सैव प्रमेत्युच्यते।

तद्वनिष्ठ विशेष्यतानिरूपिततन्निष्ठप्रकारताशालित्व मेव। तादृश प्रामाण्योत्पादकं यत् ज्ञानं तादृश ज्ञान समुत्पादक साधन सामग्री समुत्पादक जन्य विषयत्वम्। अतएव तस्यैव ज्ञानस्य प्रामाण्यमूलकत्वेनैव तत्रापिप्रमितिजनकत्वं स्वीकुरुते आचार्य:। भट्टानां विचारेतु समस्त ज्ञान निन्द्रियजन्याविषयमेववोध्यम्। अनेन हेतुप्रबन्ध वाक्येन ज्ञानपदस्य ज्ञान सामान्य परत्वमेव स्वीकरणीयं समै:।

अत: लौकिक विषयता शून्य त्वेनैव मन्तव्योयम्। तत् आत्मनिसमवाय सम्बन्धेन विद्यमानाऽलैकिक विषयता भिन्न विषयता संसर्गेणप्रत्यक्षं प्रति तादृश ज्ञानस्यतादात्म्य सम्बन्धेन प्रतिबन्धकत्वेन तादृश ज्ञानस्योपपत्ति: समवलोक्यते तेनाचार्य प्रवरेणेति विज्ञातव्यमिति। प्रमात्वस्य स्वतोग्राह्यत्वयक्षे ज्ञानस्य स्वप्रकाश रूपत्वेन तज्ज्ञान प्रामाण्य तेनैव समूहालम्बनज्ञानेन विषयीक्रियतेतत्त्वविदा महता आचार्य प्रवरेण।

प्रमात्वं नाम ज्ञानवृत्तिलक्षण विशिष्टं तद्वति तत्प्रकारकत्वंस्वतो ग्राह्यमेवेति विद्यते। स्वतोग्राह्यत्वं च—

स्वप्रामाण्या ग्राहक ज्ञान ग्राहक सकल सामग्री जन्य ग्रह विषयत्व मेवेति व्याचक्षते मीमांसक:।

गुरूणां विचारेतु–

ज्ञानमात्रस्य स्वप्रकाश रूपत्वेन तद्भिन्न ज्ञान विषयत्वस्यावश्यक त्वेन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तादृश प्रभात्वस्य तादशज्ञानभिन्न ग्राह्यरूपत्वेन तज्ज्ञानाय ज्ञानान्तरस्यावश्यकत्वेन तमयेक्षत एवेत्यनवस्था दोषः भवत्येवेति निश्चयं मन्ये अप्रामाणिकानन्त पदार्थ कल्पनायाः जायमानतया भवत्यनवस्थादोषः। ज्ञान वृत्तित्व विशिष्टंतु तदवद् विशेष्यकत्वावच्छिन्न तत्प्रकारकत्वात्मकप्रामाण्य मित्यस्यैव जायमानत्वमेवेति निश्चयः।

एतावता विज्ञायते यत् यद्धर्भ प्रकारक ज्ञान प्रामाण्यं यदा भवेत् तदनन्तरमेव तद्धर्म प्रकारक ज्ञान ग्राहक यावद् ग्राह्यत्वमेव वोध्यम्। एवमन्येषां तावदाचार्याणां विचारपक्षेतु तादृश प्रामाण्याग्राहकस्वाश्रय ग्राहक चक्षुः संयोगादि सामग्री सम्पाद्य ग्रहत्व व्यापक विषयिता निरूपकत्वस्यैव स्वतोग्राह्यत्वमेवेति ज्ञातव्यम्। यतोहिविशिष्ट बुद्धौ विशेषण ज्ञानस्य कारणत्वं वरीवर्ति। विशेषणज्ञानाभावेसति विशिष्ट ज्ञानाभावः कुतः सम्पद्यते। विशिष्ट ज्ञानं प्रतिविशेषणज्ञानस्य कारणत्वात्। नागृहीत विशेषणबुद्धिः विशिष्टे समुप जायत इति प्रतीतिवलात्। तत्र प्रमाणंतु- अयंघट इत्याकारिका घीः विशेषण ज्ञान जन्या विशिबुद्धित्वात्। तेन वैशिष्ठयानवगाहि ज्ञानस्य प्रत्यक्षं नैव जायते। घटमहं जानामि'' इत्याकारक प्रत्ययात्। तत्रात्मनि ज्ञानं प्रकारीभूय मासते। ज्ञाने घटस्तत्र घटत्वम्। यः प्रकारः तदेव विशेषणम्। विशेषणेयद्विशेषणं तद् विशेषणतावच्छेदकम्। अतएव विशेषणतावच्छेदक प्रकारकं ज्ञानं विशिष्ट वैशिष्ट्यज्ञाने कारणम्। तेन जात्यखण्डोपाद्यतिरिक्तपदार्थस्य किञ्चिद्धर्म प्रकारकत्व नियमात्।

यद्यत्र शुक्तिरजतयोरिमे रजते'' एताद्दशं ज्ञानं संजातं तत्र रजतांशे कथं प्रमास्यादिति। कथंतु पूर्वोक्त ज्ञानस्य भ्रमभिन्नत्वाभावात्। तेन तद् विशेष्यकत्वेसति तत्प्रकारकत्व विशिष्टं ज्ञानं प्रभा। स्मृतेरपि प्रभात्वेन तत्करणस्यापि प्रमाणान्तरत्वं भवेदेवेति सत्यमामाति। यथार्थानुमवकरणस्यैव प्रमाणत्वेन विवक्षितत्त्वात् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तेन कपालादौ संयोगादि सम्बन्धेन घटपदादि ज्ञाने संवृत्ते सं जातातिव्याप्ति निरासाय यादृश सम्बन्धेन यदवत्ता विद्यते ताहश सम्बन्धेन तद्वद् विशेष्यकत्वेसति तत्संबन्धावच्छिनन प्रकार कत्वं वक्तव्यम्। अतः संयोगादि सम्बन्धेन संजाते घटादि ज्ञानेनातिव्याप्ति शंकावसरः समागच्छेत्। तेन निर्विकल्पकस्यापि सप्रकारकत्वविरहेण तद्दोष निराकरणाय मूले तत्प्रभा न प्रमेति कारिकामवतारयति।

नन्वेर्ष वृक्षत्वावच्छेदेन कपिसंयोग ज्ञानस्य विरुद्धविषस्यापि समानाधिकरण्येन भ्रमप्रमात्वयोः प्रतीतिप्रत्यापत्तिः। अतएवं प्रतियोगि व्यधिकरणकपिसंयोगाभाववति संयोगज्ञानस्य भ्रमत्वात्। अथापि कपि संयोगाभावावच्छेदेन वृक्षे संयोग ज्ञानस्य कथं भ्रमत्वमिति कथनं प्रमाण सम्मतत्वेन संयोगाभावस्य प्रतियोगिसमानाधिकरणत्वात्। इत्यादि कथनं नैव समुपयुक्त मितिवाच्यम्। संयोगाभावावच्छेदेन तादृश ज्ञानस्य भ्रमत्वेन वृक्षस्थांनानुगतत्वेन तल्लक्षणस्यानुगम विरहेऽपि न मनागयिकाप्यनुपपत्तिः।

न्यायराद्धान्त सम्मतपरतोग्राह्यत्व विचार पक्षं स्वीकृत्य तमे व सिद्धान्तं युक्त्या व्यवस्थापयितुं पुनश्च मीमांसक मत सुसिद्धस्व तो ग्राह्यत्वं निरसितुं तद्विशेष्यकत्वावच्छिन्न तत्प्रकारकत्वात्मकं ज्ञाननिष्ठं यत् प्रमात्वं संशयानुपयत्त्या न कदाचन स्वतोग्राह्य मिति व्याचष्टुं क्षमते मीमांसकः।

यदायन्त्र स्वतो ग्राहयं प्रामाण्यं मीमांसक सम्मत सुसिद्धिः भवेत् तदा प्रथम सलिल ज्ञानोत्तर सुसम्पन्नस्थितौदूरेणसमवलोकिते सं जाते सति सलिल ज्ञानं प्रभा नवेति नितान्तमनुभवसिद्धप्रभात्व संशयोनोपपद्येत। कथंतु अनुव्यवसायेन निश्चयादिति मणिसम्मतविचारव्याख्यानं विदुषांमण्डले नितरां शोभाधायकमेवेति निश्चर्य प्रतीमः।

हेतुनाऽभुना ज्ञान निष्ठं प्रामाण्यं सदानुभेयमेवेति धीमतां पराशमर्शः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यदि नाम अप्रभां प्रभा विभाग कम मर्यादया प्राथम्येन अनप्रामाण्यस्य परतो ग्राह्य वचन सिद्धान्त व्यवस्थायनस्यौचित्यं वरीवृतीति किन्तु प्रभकराचार्य विचारपक्षे प्रभात्वस्याप्रसिद्धत्वेन प्राधान्येन प्रभात्वस्यैव व्याख्यानं परमावश्यकमिति चतेसि समवाधाय तन्निषेध मुखेन कारिकायां ग्रन्थकारेण प्रतियादितं यत्— प्रभात्वं न स्वतो ग्राह्यं संशयानुपयित:।

अत्रेदं तात्पर्यं विद्यते यत्–

ज्ञान प्रामाण्यं तद प्रमाण्याग्राहक यावद् ज्ञान ग्राहक सामग्री ग्राह्यमस्ति न वेति विचारदशायां तावदमनुमान स्वरूप माकलयितुं तन्निर्णेतुमयितद् स्वरूपं व्याचष्टुं तदेवात्र प्रस्तौति अनुमानस्वरूपम्।

एतावता पूर्वापरसन्दर्भसौन्दर्येण विज्ञायतेऽस्मामि: किलनैयाकि राद्धान्तसम्मत परतोग्राह्यत्वपक्षस्यैव साधुत्वं निगमागम विचारपूर्वकत्व संमतमिति व्याचचक्षे विश्वनाथ पञ्चानन:। ज्ञाननिष्ठ प्रमात्वस्यतद्वि शेष्यकत्वावच्छिन्न तत्प्रकारकत्वमेवति इत्यते। नैव स्वतोग्राहयत्वम्। किन्तु परत्वमेवावसेयमेवेति न्यायसिद्धान्त:।

हेतुनाऽमुनादिनुमानेन तथाऽवोधियत्तर्कतन्त्रशतपत्रसहसूरश्मिना मणिना मण्यालोके मिश्रै: निवारिततमिस्त्रै:। अनेनामुमानेना वगम्यते तार्किक शिरोमणिना न्यायमणिना।

यद्यप्यत्र प्रामाण्यं स्वतोग्राह्यमेव सम्यद्येत् तदाऽनभ्यास दशायां दूरेणावलोकिततज्ज्ञानं प्रमाणमवेति तादृशानुमानसिद्ध: प्रमात्वसंशयोनोपपध्यते। तथाप्रमाण्यस्यानुव्यवससायत्मक पद्धत्या निश्चित्वात्। अतएव ज्ञान प्रामाण्यं नितान्तमनुमेयमेवेति सत्त्यमाभाति।

यद्यप्यत्र तादृश विभाग कमर्यादया प्राधान्यऽप्रामाण्यस्य परतो ग्राहयत्व

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सिद्धान्त व्यवस्थायनस्यैचित्यं प्रतीयतेविदुषा, तथापि प्रभाकर भते तादृश प्रभात्वस्य सर्वथालीकत्वेन प्रथमं प्रभात्वस्यैव न्याय निष्पन्नं परतो ग्राह्यमेवेति। परतोव्यवस्थापनं कुर्वन् स्वमतेन कार्यकारण भावं प्रदर्शयितुं न्याय सिद्धान्तयक्षं व्यवस्थापयितुं च मुक्तावलीकार: स्वकीय विचारं प्रस्तौति प्रभात्वंन स्वतोग्राह्यं संशयनुयपत्तित: तथा च-

अत्रेयं विप्रतिपत्ति: सन्तिष्ठते यत् तार्किकाणां पुरत: ज्ञाननिष्ठप्रामाण्यस्य तादृश प्रामाण्यज्ञान सम्पादक सकलज्ञान विधायक साधन सा मग्री सम्पाद्यमस्तिनवेति शङ्का विधान क्षमस्यौचित्यमस्ति नवेति विधानस्य नितान्तं प्रमाण्यपदर्वी स्वीकुरुते। अतएव भूल ज्ञानस्यस्व-प्रकाशरूपत्वेन तज्ज्ञानप्रमाण्यं तेनैव गृह्यते। एतावता सन्दर्भवचसा विज्ञातं भवति यत्—

यद्धर्थ प्रकारक ज्ञान प्रामाण्यं तद्धर्मप्रकारक ज्ञान ग्राहक सकल ज्ञान सम्पाद्यम् सामान्यतया तज्ज्ञान ग्राहक यावद् ज्ञान ग्राह्यत्वात्। अवेनानुमानवचसा स्वकीय विचार चातुर्यमाकलयितुं दादर्यतया तत्पक्षप्रतियेधमुखेन संशयानुययत्तित इति वचनं प्रमाणपल्लवपुपडरी मार्तण्ड मण्डेल नैव वचसान्यगादीत् सर्वं सोययत्तिकत्वेनैव न्यायसिद्धान्त वागीश:।

तथाच मदृविचारं चोररीकृत्य तादृश ग्रहस्यानुमिति विषयत्वं तत्रास्ति प्रमाण परिपुष्टवचनविलासेनमरीचिमालिना स्व रश्मि ना । नात्र केषां वैमत्यं च परिशङ्कनीयं विद्वद्भि: तर्क विचारकुसुम सौरभास्वादनतत्यरेण तत्त्वविचारमकरन्द मिलिन्देन प्रमाणतत्त्व प्रसूनास्वाद् प्रगल्मेन प्राज्ञिकेनेति सर्वथा विभावनीयमिदंवच:।

अतएवं मदृविचारं चोररीकृत्य तादृश ग्राह्यानुमिति विषयत्वं तत्रैव विध्यन एवेति निश्चप्रचम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तथाच सर्वमेवज्ञानमतिन्द्रियं विचार सिद्धत्वेन निष्यन्नमिति त्रिकाल सत्यमामाति। तेन घटत्वति घटत्वप्रकारकत्व विशिष्टमतिन्द्रियं यद् घटज्ञानं तादृश प्रामाण्यस्यैव पक्षं स्वीकुरुते मीमांर्गासकविचारसरणिः।

मीमांसक विचार मनुसृत्य तत्यक्षं समालोचयन् न्यासिद्धान्तविचार प्रभाकरः दिनमणिरिव तत्प्रकाशं मिश्रः चकाशते, यत्-तादृश विचार ग्रहस्यैवानुव्यवसायत्वंब्रूते। तेन कारणवैचित्र्येण घटोयमित्याकारक ज्ञानाव्यवहितोत्तरजायमानोघटत्वेनघटमहंजानामिचे त्याकारकानुव्य-सायायात्मक ग्रहस्य तादृश विषयत्वमस्ति नवेति स्व चार एवं तस्य वैशिष्टस्यमादधाति।

अतएव मूले मीमांसकाना विचारे तु ज्ञानमतिन्द्रियम्, ज्ञाजन्याज्ञातता प्रत्यक्षैवास्ति, तेन हेतुना ज्ञानमनुमीयतएवेति निश्चयः। तन्थायि प्रभाकर विचार माकलय्य तजज्ञानस्य प्रभाविषयत्वेतज्ज्ञानाप्रामाण्याविषयक ज्ञानाश्रय ग्रहाकसाधनजन्यव्यापकविषयितानिरूपकत्वमेव स्वीकर्त व्यमेवास्ति।

तेन तत्र तदेव स्वगाहययदेन चोहहनीयम्। यद्यपि विशिष्ट बुद्धौ विशेषण कारणत्वं नाङ्गीकुरते प्रभाकरः, कथंतु तावदनुपस्थितस्य प्रमाण्यस्य कथमपितत्र मानं नितान्तं गगनकुसुमायमानमेवेति प्रतिभाति।

मट्टापदानां विचारे तु तावदात्मसमवेत वृत्तिलैकिक विवयता सम्बन्धेन प्रत्यक्षं प्रति धर्माधर्मयोरि तादात्म्येन यथा प्रतिबन्धकत्वं स्वीकुरुते तथा ज्ञानस्यापि प्रतिबन्धकत्वमक्षतमेवेति विदुषां विचारप्रवाहःसर्वथा साधीयन् विभाति।

घटोयमित्याकारक प्रत्यक्षानन्तरं घटे ज्ञातत्वममिधीयते श्रीमता आचार्य प्रवरेणेति। तदनन्तरमेवेतिज्ञानजन्यविषयवृत्तिपदार्थान्तरस्यैवावोधः समुययद्यते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतएव तदवद्विशेष्यकतत्प्रकारकज्ञानजन्यत्वस्याप्यवृत्तितत्प्रकारक-ज्ञाततावतीयमित्याकार कोत्र: संजायतएवेति निश्चय:। तथानुमान प्रयोग:-

इयं ज्ञातता घटत्वति घटत्वप्रकारक ज्ञानजन्या, घटवृत्ति घटत्व प्रकारकज्ञानजन्या, घटवृत्तिघटत्वप्रकारकज्ञाततात्वात्। तेन घट: घटत्ववद्-विशेष्यकघटत्वयप्रकारकज्ञानविषय: घटवृत्तिघटत्वप्रकारक ज्ञाततात्वात्, यन्नैवं तन्नैवं ज्ञान प्रामाण्ये तद्प्रमाण्यग्रहाजनक स्वाश्रयानुमितिजनक ज्ञाततालिंगकपरामर्शात्मकसामग्रीजन्यग्रहत्व व्यापकविषयिता निरूपकत्वमेव तेषांविचारपक्षे भाट्टमते स्वतोग्राहयत्वं सिद्धयति।

मुरारिमिश्राणां विचारेतु:-

अनुव्यवसायोत्तरमनुव्यवसायेन ज्ञानगतप्रामारण्यंगृह्यते। तथा तनैव विषयीक्रियते। तथा च घट इत्याकारक व्यवसायान्तरं घटत्वेन घट महं जानामीत्यनुव्यवसायात्मकलैकिकमानसंज्ञानमित्युच्य तेन तादृशानुव्यवसायेन तादृशव्यवसायात्मकं प्रमाण्यं गृह्यतएवेतिनिश्चीयते।

अतएव मिश्रमते ज्ञानप्रामाण्ये तादृशाप्रामाण्याग्राहकस्वाश्रय ग्राहकं मन: संयोगादि सामग्री जन्यामितिव्यवसायात्मकग्रहत्वव्यापाकविषयिता निरूपकत्वं स्वतोग्राह्यत्वमित्यव गम्यतेतेन विदुषा। हेतुनाऽमुना समेषांविचरे प्रमात्वाप्रमात्वंस्वतोग्राहयमितिसिद्धयति। सांख्ययोगानां विचारपक्षे प्रभात्वं-स्वतोग्राह्य मेवेतिविचारं स्वीर्कुवते तदनुयायिन: तथाचान्येषां दार्शनिकानां विचारेऽपि तदित्त्थमेवेति निश्चिनोमि ।

अत्रेदं तत्त्वं वरीवर्ति किल प्रमाणत्वाप्रमाणत्वे स्वतोग्राह्यत्वमेवेति मन्यन्ते समे विद्वांस:। नास्तिकेषां विचार वैषम्यं विद्यते । केवलं नैयायिका: परत्वमेव मन्वते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत्रेदं तत्त्वं विज्ञातव्यं विद्वद्भिः यत्–

अनुव्यवसायस्य तादृशविषयकत्वेन तथाव्यसायविषयाणां घटपटत्वादीनां तादृशाविषयकत्वेन घटत्ववति घटत्व प्रकारकत्वं यत् विषय घटित प्रामाण्यं विद्यते। तस्य विषयीकरणत्वाभावेन मिश्रादिसांख्यविचारे तथानुवसाये प्रामा विषयकत्वाङ्गीकारे तथायुक्तत्वं स्वीकुरुते कोपि। तथाचेत् स्वतोग्राह्यत्वं तत्र नोयपद्यते। विषयनिरूप्यं ज्ञानम्। कथंतु विषयता सम्बन्धेन ज्ञानं प्रति विषयस्य तथामेदसम्बन्धेन कारणत्वमस्ति। नात्र केषां विवादावसरः समुपसर्पति। विषयनिरूप्यं हि ज्ञानं भवति। तच्च-किञ्चिन्निष्ठ विषयतानिरुपकविषयिताव्याप्यम्। निर्विषयकस्य ज्ञानत्वे प्रमाणाभावात्।

अतएव ज्ञानस्य वित्तिः ज्ञानम्। तेन वेद्यः विषयीकर्तव्यः। एतेन ज्ञातं भवति किल घटपदादिपदार्थस्य यद्य व्यवसायत्वेन व्यवहार योग्यत्वेन च विषय योग्यतां व्यवहार योग्यतामाकलयति तथा तथात्मक प्रत्यासत्त्या अनुव्यवसायपथेनायिते विषयाःविषयीक्रियन्ते। अतएवनुव्यवसाय विषयसत्वं प्रामाण्ये निरावाधतया प्रतिभाति। कथंतु ज्ञानविषयाणां ज्ञानविषय विषयकत्व प्रत्ययवलात्। प्राककालीन तद्विषयोत्तरोत्तर प्रत्यक्षीकृत ज्ञान परम्परां प्रति पृथककालीन ज्ञानस्य प्राथम्येनतदुपजीव्यत्वात्।

एतावताविज्ञायते यत् घटानुव्यवसायः तादृश विषयकः व्यवसाय पद्धत्या घटोपजीवकत्वे सति ज्ञानत्वात् स्मरणवत्। एवं तादृश पन्थेन तेविषयाः ते स्वतः प्रामाण्य वादिनः स्वविचार पक्षं निश्चिन्वते।

अतः प्रामाण्यस्य स्वतः ग्राह्यत्वमेव स्वीकुर्वते। नात्र प्रमाणान्तर मपेक्षते। अनावश्यकलात्। संशयानुपयत्व मूलकत्वेन परतः प्रामाण्य वादिनः नैयायिकाः तं विच्छेतुं वद्ध्यप रिकराः तदुनुपपत्तिमिया निराचक्रुः। अतः मूले विश्वनाथ पनचाननः प्रोषाच यत्—

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रमात्वं न स्वतोग्राह्यं संशयानुपपत्तितः ।

अत्रेदं समालोचनीयं यत् समैः-

मीमासकानां विचारमाहृत्य धीधनेशास्तदित्थे व्याचक्ष ते यत् ज्ञान-निष्ठंप्रमात्वं यदिनामप्रमात्वंनाङ्गीकुर्वते चेत्तदा संजाते कस्मिन्नपि ज्ञाने-अनभ्यासदशायां तादृशस्थितिक्षणायन्नदशायामपि प्राथम्येन सति जलज्ञान सम्पन्ने ऽपि तत्रैव सर्वननानुभवसिद्धेऽपि जलज्ञानं प्रमानवेति स्वतोग्राह्यत्वेन कथमपि संशस्यो नैव सम्पद्येता कस्मादपि वस्तुनः निश्चपात् प्रागेव सैशयः नतु पश्चात्नोदेति सर्वानुभव विरोधात्। नहि केषां विपरीता प्रतियत्तिः निश्चिता भवति। अतएव सर्वानुभवविरुद्धस्यतादृशव्यवहारस्यप्रामाण्यं नैव सर्वसमतमिति। कथं तर्हि संशयग्रन्थिप्रतिपत्तिः निष्यन्ना जायते।

अनेनैव कारणकदम्बप्रबन्धेन विज्ञायते यत् - नैवप्रमाणं स्वतोग्राह्यमिति तार्किकाणां विचारमञ्जरीसत्यभमामाति।

यद्यत्र ज्ञानस्य प्रामाण्यं स्वतोग्राहयमेवेति साधीयः, तदाऽनभ्यास दशायां प्रामाण्य संशयोन स्यादिति तावदयमेव पक्षः श्रेयान् । यदिज्ञानं ज्ञातं तदातेषां विचारे प्रामाण्यमपि ज्ञातमेवेत्यतो तदा धर्मिज्ञानाभावात् कथं संशयावसरः समागच्छेदिति तार्किकाणां विचार वैभवं प्रामाण्य पदवीं स्वीकुर्यादिति।

अत्रकोचिदित्थं प्रतिपादयन्ति यत्-

अगृहीतज्ञानस्य प्रमात्त्वेन प्राथमिकोत्पन्न ज्ञानामं। प्रभात्वपरियालनाय संजातेऽपि प्राथमिकज्ञान समानाकारकज्ञानंविना स्वाव्यवहितोत्तर क्षणावच्छेदेन तदनन्तरमेवप्रमात्वसंशयोनिर्वहत्येवेति निश्चयं समवगच्छामि। एवं परिस्थित्यामस्यां संशयानुत्यत्त्या तादृश बाधक सत्त्वात् प्रमात्वं स्वतो न

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्राह्यमिति तात्पर्यं पूर्वोक्त तोताचार्यावधारणतया प्रमात्वस्य स्वतोग्राह्यत्वं नैव प्रमाणतर्काभ्यांपरिपुष्टमिति।

किञ्च गुरुमते घटत्वेन घटम हं जानामीत्याकारक समूहालम्बनज्ञानाय यथेन्द्रियसन्निकर्षज्ञानमयेक्षते तथा घटत्ववतिघटत्वप्रकारकत्वात्मक प्रामाण्यस्य विषयघटितनतज्ज्ञानसम्पादनायेन्द्रिय विषयसन्निकर्षघटित परम्परासन्निकर्षायेक्षयातादृशापत्या लाघवसहकृतानुभव सिद्धानुमानस्यौचित्यमेव परतोग्राह्यत्वमेवसाधु। किन्तु तादृशं सन्निकर्षाऽनङ्गी- कारेतुस्वतो ग्राह्यत्वमेवेति नितरां सर्वदा संगच्छतएवेति निश्चयं मन्ये। ज्ञातोघट इतिप्रतीत्या घटांशे ज्ञाननिरुपितविषयत्वावगाहनेन तादशस्वीकारस्य प्रमाणाभावतया ज्ञानविषयत्वस्याऽप्रसिद्धतया स्वतः ग्राह्यत्वे प्रमाणराहित्यमेव नितान्तमवगच्छामि। एवं च घटत्वप्रकारक समवायसं सर्गक घटनिशेष्यक ज्ञानस्यैव प्रमात्वेनमिश्रैश्चानुव्यवसाये समवाय मानानङ्गीकारतया तद्घटितप्रमात्वस्य स्वतोग्राह्यत्वयक्षस्यपि निर्युक्तिक एवेति सत्यभामाति।

तथा च तादृश व्यवसाय प्रत्यासत्त्या घटघटत्वेयोरिव समवा यस्यमान मङ्गीकुरुते चेत् तदा सामानाधिकरण्यसंसर्गेणप्रमेयत्वविशिष्टोघटइति ज्ञानाम् सामानाधिकरण्यघटकत्वेनसकलप्रमेयस्यापिसंसर्गमर्यादया मानं संगतमेवेति घ्येयम्।

तेन मिश्रसम्मत यक्षस्यौचित्यं सर्वथा संगतमेवेति ज्यायान् विचारः प्रतिमाति। अतएव मूले तदित्त्थंवरी वर्ति यत् ज्ञाने प्रामाण्यमनुमयेमेवेति निश्चयः।

अतएवं विज्ञायतेऽस्माभिः किल- ज्ञाननिष्ठोद्देश्यतानिरूपितानुमिति निरुपितविघयेतावदेवप्रामाण्यं किंवाप्रमात्वंज्ञातव्यम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयमेतु किमपि ज्ञानानन्तरं प्रवृत्तौ सत्यीतथापिकिमपि लाभे विद्यमाने तथानुभीयते विदुषाकिलतथातत्रानुमानस्वरूपमितिज्ञातव्यम्—

इदं ज्ञानं प्रमासंवादिप्रवृत्तिजनकत्वात्। एवं तथेदं पृथिवीत्वप्रकारकं ज्ञानं प्रमा, गन्धवतिपृथिवीत्व प्रकारक ज्ञानत्वात्। अनेनैव यथा अन्यत्रापि सिद्धिः कर्तव्येति निश्चीयते तार्किकप्रवरैः।

अतएव गन्धनिष्ठविशेष्यतानिरूपितपृथिवीत्वनिष्ठ प्रकारताकज्ञानत्वाश्रयत्वात्। तेनवचनप्रावल्येन विशेष्यविशेषणत्वे विनिगमनाविरहप्रयुक्त-गौरवाकाशः नावलोक्यते। अथ हेतुतावच्छेदक सम्बन्धस्यापि नैवाप्रसिद्धत्वमपि नितान्त भवगच्छामि।

अनया दिशाअन्यत्रापि प्रामाण्यमनुमेयमेवेति निश्चितम्।

अथवा केनापि विदुषा वचनान्तरमपि विज्ञायते। स्वाश्रयनिरूपित स्नेहवन्निष्ठविशेष्यतांनिरुपित जलत्वनिष्ठप्रकारताकत्वसम्बन्धेन ज्ञानस्य कारणत्वम्। यद्याग्रहःभवतांवरीवर्तिचेत्तदा प्रामाण्यस्य स्वतोग्राह्यत्वमेवास्ति तदा अभ्यासराहित्येन प्रथमजलदर्शनोत्तरं ज्ञानदशायां दूरावलोकितेजलेसति जलज्ञानं प्रमानवेत्युभवसिद्धः प्रमात्वसंशयो नोपपद्येत। कथं तु अनुव्यवसायपथेनप्रामाण्यस्यनिश्चयोभवत्येवेति। अतएव ज्ञानप्रामाण्यंयुक्त्यासर्वदाअनुमेयमेवेति विदुषां विचार प्रवाहः।

अत्र यद्यपि प्राथम्येन सर्वदाऽप्रामाण्यस्य परतोग्राह्यत्वराद्धान्त व्यवस्थापनस्यौचित्यंसर्वसम्मतमेवेति साधीयान्पक्षःप्रतिभाति। यद्यप्याचार्य-वर्याणां प्रभाकराणां विचारपथे सदाऽप्रमात्वस्यालीकत्वेन प्राथम्येन प्रमात्वस्यस्वतोग्राह्यत्वं व्यवस्थापयितुं प्रयतते मूलकारः।

प्रपूर्वकमा धातोः करणाधिकरणयोश्चेति सूत्रेण करणेल्युटि तदनन्तरं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ष्यत्रिनिष्यन्न प्रामाण्यशब्दस्य यत् प्रमात्वमर्थः विद्यते, तस्यैवपक्षत्वं संभवति। वास्तविकंतु तदवति तत्प्रकारकज्ञानत्वस्य घटाद्यर्थ मेदेन भिन्नत्वात् कुत्रापि प्रामाण्ये सकलज्ञान ग्राहक सामग्रीग्राह्यत्वं तेन रूपेण न संभवति, परन्तु तद्धर्मप्रकारक ज्ञान ग्राहक सकल साधन साध्यत्वं नैव कदाचिदपि संभवति, किन्तु तद्धर्म प्रकारक ज्ञानग्राहक सामग्री ग्राह्यर्त्वं तैन रूपेणावगन्तव्यमिति तार्किक प्रकाण्डपण्डितेन सर्वदा नितान्तभवसेयम्।

अनेन विज्ञायते यत् प्रभात्वं तेनैव समूहावलम्बनात्मकज्ञानेन घटत्वेन घटमहं जानामीति व्यवसायेन गृह्यते। हेतुनामुना घटत्ववन्निष्ठ घटत्व प्रकारता निरुपित विशेष्यता निरूपकत्व विशिष्टज्ञानाश्रयोहमिति ज्ञानं जायत एवेति निश्चयः।

प्रभाकरमतेतज्ज्ञानप्रभात्वे तदप्रामाण्याग्राहक स्वाश्रयग्राहाकं चक्षुः संयोगादि साधनजन्यग्रहत्वव्यापक विषयिता निरूपकत्वस्यैव स्वतोग्राह्य पदेन विज्ञातव्यमिति तेषां विचारसरणिः।

विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वं वर्तत एवेति समेषां विचार मार्गः. तथापि तत्राप्यनुपस्थितस्यापि प्रामाण्यस्य भानं भवत्येवेति विचारपरः। नात्रावसरः मतभेद प्रकारस्य। न्यायभिन्नाचार्याणां कृते प्रामाण्य सम्मत पक्षं समालोच्य नैव परत्व व्यवस्थापन चातुरी नावलोक्यते तेषां समाज कुमारिल भट्टविचारे स्वतोग्राहयत्वे कापिशक्ति प्रसूनाञ्जलिः दृष्टिपथे समागच्छति। अथच—

संशयानुपपत्यादिदोष कलंक कवलितत्वेन तादश दोषेण च ज्ञान निष्ठ प्रामाण्यस्य त्रयाणांविदुषां विचारजालशंकासंसिद्धस्वतस्त्वाऽसंभवेन तादश ज्ञाने प्रामाण्यमनुमेयमेवेति निश्चयं प्रतीमः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तथा च— इदं ज्ञानं प्रभासंवादि प्रवृत्तिजनकत्वात्। यन्नैवं तन्नैवं यथाऽप्रभा। एवंच- इदं पृथिवीत्वप्रकारकंज्ञानं प्रभा- गन्धवति पृथिवीत्व प्रकारक ज्ञानत्वात्। तथाचेदं जलत्वप्रकारकं ज्ञानं, प्रभा, स्नेहवति जलत्वप्रकारक ज्ञानत्वात् । अतएव यत्र साध्यं नैवास्ते तत्र नास्ति साधन मपि। नात्रशंकावसरः समुपसर्पति । यन्था शुक्तौ इदं रजतम्।

अथचापर घटज्ञानं-प्रभा-तथा चाग्रप्रमात्मक घटज्ञानजातीयत्वात्। पूर्वोक्तज्ञानवत्त्वात्। साजात्यं च- समर्थप्रवृत्तिअनकत्वेन ज्ञातव्यम्। अतएव त्रयाणां मीमांसकानां विचार प्रनाह वैलक्षण्येन तावदिदं विज्ञातं भवति यत् तादृश तद्विषयक-ज्ञान निष्ठप्रामाण्यनिश्चयःकारणंविद्यते। तेन तादृशकार्यकारण भावस्य कथंचित् व्यभिचारादि दोष ग्रस्तत्वे प्रवृत्ति कारण दोषेण प्रामाण्यनिश्चितत्वात्।

अत्र प्रवृत्तिं प्रति इष्टसाधनाता ज्ञानस्य कारणत्वं वरीवर्ति । इत्यात्मक न्यायसिद्धान्तानुसारं तादृश ज्ञान सत्त्वे ग्रीष्मकालीन वृक्षस्यादि विशिष्ट क्षितौ तावदनायासेन गन्यविशिष्टस्य प्रत्यक्षानन्तरं पूर्वोक्त तादृश समर्थ प्रवृत्तिजनकत्वस्यावमासाभावतया प्रभात्व निर्णयस्य वोद्यः कथं सम्पद्यते।

न च परिस्थित्यामस्यां कथं हेतुज्ञानं भवेदिति वाच्यम् । कस्यापि ज्ञानस्य पृथिवीत्वप्रकारकज्ञानत्वेनानुव्यवसायज्ञान तादृशतन्निष्ठपृथिवीत्वप्रकारक ज्ञानत्व स्यापि तद्विषयत्वेन स्वतोग्राह्यत्वात्।

अनुव्यवसाय पद्धत्या स्वतोग्राह्यत्वात् । अनुव्यवस्यायेत्तर निश्चयस्य प्रभात्व साधकत्वेन तन्निश्चयात् ।

गन्ध प्रत्यक्षानन्तरं तादृश तन्निष्ठगन्धवद्विशेष्यकत्वास्यापि पूर्वगृहीतत्वेनानुव्यवसायविषयत्वात्तेनगन्धग्रहेण गन्धवद्विशेष्यकत्वस्यापि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पूर्वग्रहीतत्वेनानुव्यवसाय विषयत्वात्। तेन गन्ध ग्रहेण गन्धवदविशेष्य-कत्वस्यापि अनुव्यवसाय विषयत्वेन सुग्रहत्वात्।

गन्धाधिकरणे पृथिवीत्ववदिव तुल्यप्रमाणतया पृथिवीत्ववति तादृश तत्प्रकारकत्वात्मक प्रभात्वस्य च ज्ञानविषयात्मकविषयेवाधका भावत्वेन प्रभात्वस्यानुमेयत्वेनसुतरांनिर्वीजमेवेत्यतोसंशयानुरोधेन तत्प्रकारक-त्वावच्छिन्न तद्वद्विशेष्यकत्वं परं नैव गृहयते केनापि। अनुव्यवसायतया नैव विषयीविधीयते। तेन वस्तुतः- अवच्छेद्यावच्छेदकभावापन्न तद्वद्विशेष्यकत्व विशिष्ट समानाधिकरण तत् प्रकारक त्वात्मकप्रभात्वमेव स्वीकरणीयम्।

तथा चानु व्यवसाय विषयत्वस्य तादृश निश्चयतया सर्वजन प्रतीति सिद्धसंशयस्याऽन्यथासिद्धत्वेन तादृशविशिष्ठ तत्प्रकारकत्वमेव प्रभात्वं स्वीकार्यम्।

अतएव तादृशप्रमात्वसम्पादनायानुभानस्यावस्यकत्वं परमावश्यकं प्रतिभाति।

अत्र केचिदित्त्थं समालोचकाः प्रतिपादयन्ति यत्कथं तर्हि प्रभात्वस्य संसिद्धिरिति वाच्यम् । ज्ञान प्रभात्वस्यस्वतो ग्राह्यत्वात् ।

किंच प्रकारमेदेन प्रामाण्यमेदस्य सुतरां संसिद्धतया घटत्व प्रकारकत्वादेः कथं प्रसिद्धिरिति वाच्यम्। ज्ञान प्रभात्वस्य स्वतो ग्राह्यत्वात् । किं च प्रकारमेदेन प्रामाण्यमेदस्य सुतरां संसिद्धत या घटत्वप्रकारकत्वादेः कथं प्रसिद्धिरिति वाच्यम् ।

घटत्वप्रकारकत्वस्य स्व विशेष्यकत्वस्य च स्वतो ग्राह्यत्वात् । घटस्य च प्रागेवोपस्थित्वाच्च ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नन्वत्र केचिदित्थं कामयन्ते किल प्रथमक्षणोत्पन्नानुव्यवसायस्य धर्मितावच्छेदकसामानाधिकरण्यप्रत्यासत्त्या प्रामाण्यवगाहनविशिष्ट सामानाधिकरण्यतया तादृशावगाहनसंशयविरोधित्वविरहेणप्रामाण्यस्य स्वतोग्राह्यत्वेऽपि संशयानुपपत्तिः कथं भवेदिति सत्यमामाति। वचनमिदंता वत् सत्त्यंप्रतिभाति। परन्तु पूर्वकथनस्य नितान्तमार्थसमाज दोषकलकं ग्रस्तत्वेन तदनन्तरं जायमान संशय समानस्य सामानाधिकरण्यमर्यादया प्रामाण्यावगाहित्वस्य प्रमाणाभावतया संशयानुपपत्ति मूलकत्वेन स्वतोग्राह्यत्वविचारयक्षरयौचित्यं नास्ति प्रमाणसम्मतमिति हेतुना विश्वनाथ पंचानने व्यलेखि यत्- प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तितः' वचन मिदं युक्तियुक्तंप्रतिभाति तर्करसिकानां सर्वथा। अतः प्रामाण्यमनुमेयमेवेति सर्वसम्मत मेवेतिवचनमदः निश्चप्रचम्।

अत्रेदं प्रतिपाद्यते केनापि धीमता यत् वास्तविकमेवाच्छेद्यावच्छेदक भावान्नं तद्विशेष्यकतत्प्रकारकत्वोभयमेवस्वीकार्यम्।

तथाचविशकलितयोविशेष्यविशेषणप्रभात्वो:स्वतोग्रहासम्भवतया कन्थमनुमानं ग्राहयत्व विचार चर्चा प्रचारः विदुषां मण्डले सर्वसम्म्त तथा वोभवीति। कथंतर्हि प्राथम्ये न दूरादेव सलिलावगाहा वोभवीति। कथं तर्हि प्राथम्ये नदूरादेवसलिलावगाहनानन्तरं सर्वसम्मततया सलिलत्ववद् विशेष्यकत्वविशिष्ट, सलिलत्वप्रकारकं तादृशं ज्ञानं विद्यते नवेति तादृशधर्म प्रकारक संशयावतारः, प्रभाणसम्मतोनवेतिनितान्तंविवेचनीयतया तादृशविशिष्टत्वकप्रभात्वज्ञानं विना तत्प्रकारकाप्रसिद्धिनिबन्धनाप्रसिद्धि रेवसम्पद्येत । अतएव तद्विशेष्यकत्व विशिष्टतत्प्रहेतुनाऽमुना सर्वसिद्धान्त सम्मततया संशयान्यथा नुपपत्त्या तादृश विशिष्ट तत्प्रकारकत्वात्मकमेव प्रमात्वं नितरां नितान्तं स्वान्तेन स्वीकर्तव्यमेति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तादृशात्मकत्वं प्रमात्वं प्रथमानुव्यवसाय संवेद्यं तथात्वंचाङ्गीकार्य मेवेति व्याचक्षते धीधनेशाः।

तज्ज्ञानाय चानुमानं प्राथम्येन परमावश्यकमेवेति तर्कसदाकल्पनीय मतः समवधार्य समैः। तस्मैप्रयोजनायानुमानं परमावश्यकं प्रतिभाति । नात्र केषां तार्किकाणां मतभेदः केनापि प्रकारेण नैव समुपपाद्यः केनापि।

अत्रेदं केनचिदित्त्थं व्याचक्षते यत्–

धर्मितावच्छेदकसामानाधिकरण्येनप्रथमानुव्यवसायस्य धर्मितावच्छेदकावच्छेदने प्रामाण्यावगाहनविशिष्टस्वीकारेणतादृश संशय विरोधित्वामावेन प्रामाण्यस्य स्वतोग्राह्यत्वेनापि संशयानुपपत्तिः भवेदेवेति। सत्यमेतत् भावत्कं वचनंप्रतिभाति। किन्तु तथानुव्यवसायसामान्यस्य सामानाधिकरण्यतया प्रामाण्यागाहनस्य कथमुपपत्तिः संभवति प्रमाणविरहात्। परन्तु तच्चिन्त्यमेवेति। तत्र समस्तानि कारणानि तत्र समवगन्तव्यानि समैः तर्कावगाहनचतुरैः।

प्रभाकराचार्याणां विचारेऽपि ज्ञानमात्रस्य याथार्थ्यतयासमेषां ज्ञानानां तावदर्थाव्यमिचारित्वेन तादृश नियम वैशिष्य्य मर्यादया तथावोधव्यमिति प्रमाण प्रतीति वलेनैवाभासतेतद्वचनम् । अतः पूर्वोक्तमेववचनं युक्त्या साधीयः।

नन्वत्र केनापि मनीषिप्रवरेण जिज्ञास्यते यत् धर्मितवच्छेदक सामानाधिकरण्येन प्रामाण्यावगाहनस्य धर्मितावच्छेदकावच्छेदेनप्रमाण्याव गाहनस्य स्वीकार्यतया ताद्दशावगाहनस्य संशयविरोधित्वाभावेन प्रामाण्यस्य स्वतोग्राह्यत्वेऽपि नैव संशयानुपपत्तिरिति चेन्मैवम् । पूर्वकालिकानुव्यवसाय सामान्यस्य तादृश सामानाधिकरण्येन प्रामाण्यावगाहित्वस्य चाङ्गीकार्यतया तदुत्तरक्षणेजायमानसंशयसामान्यस्यतादृशत्वेन प्रामाण्यावगाहनस्य नास्ति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्र प्रामाण्यं समवलोक्यते केनापि तार्किकप्रवरेण।

एवं च सलिलं जानामि' इत्याकारकानुव्यवसायानन्तरं तत्र प्रवृत्तौ सत्यां समवायेन जलत्वेन जलं जानामित्याकारकानुव्यवसायास्य तादृशज्ञानानामुपस्थितवशात् तज्ज्ञानं भवेदेवेति निश्चयं मन्ये। परिस्थित्यामस्यां प्रभाकरणां यक्षः नितान्तं साधीयान् प्रतिमाति। कथं तु ज्ञानमात्रस्य याथार्थ्यतया समेषांज्ञानानां तादृश व्यमिचारित्त्वेन तत्र नियम संकोचंव्यपदिशति नितरामाचार्यचरणः। अतएव प्रमाणलक्षणे यादतद् विशेष्यकत्वविशेषणंव्यर्थमेवाऽऽभाति।

कार्यकारणभावमूलकत्वेनात्र मीमांसकानां विचारे तादृशज्ञानस्य प्रभाविषयत्वे तद्प्राणाण्याऽजनकस्वाश्रयग्राहकालोकविशिष्टं चक्षुः संयोगादि सामग्रीजन्य ग्रहत्वव्यापकविषयितानिरूपकत्वंस्वतोग्राह्यत्वं विज्ञायते विदुषा तेन। विशेषण ज्ञानस्य विशिष्ट बुद्धौ कारणत्वस्य तेनास्वीकारात्।

तादृशोपस्थितस्यैकत्वंक्वचिदपि कारणत्वं मनुतेकोप्याचार्यः, परन्तुप्रथमं तादृशानुपस्थितस्य च प्रामाण्यस्य मानं भवत्येवेति निश्चितम्।

माट्टविदुषां विचारेतु तत्र स्वतोग्राह्यत्वंसवदा समीचीनंप्रतिभाति। ज्ञानसामान्यस्य लौकिक विषयता शून्यत्वमेव साधीयः तेषां विचारे। तादृश मीमांसक विचारगुणग्राहीविद्वान् तमेव पक्षं कक्षीकरोति। आत्मनिसमवाय सम्बन्धेन किंवांविद्यमान लौकिक विषयतासंसर्गेण प्रत्यक्षंप्रति धर्मवदिव तादृशज्ञानस्यतादात्म्येनप्रतिबन्धकत्वं तदुभयवादिमतेनसिद्धमेवेतिनिश्चितमेव।

अतएव पुराघट इति प्रत्यक्षं जायते, तदनन्तरं तत्रसर्वथा घटे समुत्पत्तिः संजायते ज्ञातत्वस्य, ततः ज्ञानाजन्य विषयवृत्ति पदार्थस्यवोधः संभवति । अनया पद्धत्या- इयं ज्ञातता घटत्वति घटत्व प्रकारक ज्ञानजन्या, घटवृत्ति प्रकारकज्ञाततात्वात् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथवा घट: घटत्ववद् विशेष्यक घटत्वप्रकारक ज्ञानविषय:, घटत्वप्रकारक ज्ञाततात्वात् । यन्नैवं तन्नैवं यथाघट:। एवं तद्भिन्न प्रकारेण। भाट्टमते च—

तादृशज्ञानप्रामाण्ये- तदप्रामाण्यग्राहक-स्वाश्रयानुमितिजनक ज्ञाततालिंगक परामर्शात्मकसामग्रीजन्यग्रहत्वव्यापकविषयितानिरूपकत्वं स्वतो ग्राह्यत्वं फलितम् ।

मिश्रमते–

तावदित्त्थं विज्ञायते श्रीमता किल तादृश ग्रहस्तु तावदनुव्यवसायएव। तथाचायं घट'' इत्यनुव्यवसायात्मक ज्ञाना व्यवहितोत्तर प्रतीयमानो घटत्वेन घटमहंजानामीत्याकारकात्मकमानसज्ञानविषयएवाभाति। हेतुनाऽमुना कारण वैलक्षण्ये न तादृशानुमित्यवसायात्मकज्ञानविषयत्वमामाति।

सर्वं तावदभिद्येयम् समर्थप्रवृत्तिजनकत्वादित्याकारकस्यसमूहालम्बनात्मकपरामर्शस्वरूपेतिमेवेवोध्यम्। तादृश समूहालम्बनात्मकानुमानविषयत्वस्य घटज्ञानात्मक प्रमीयविषये तस्य वर्तमानतयामीमांसकोभयविचारसम्मततथैवसिद्धमेवेति ज्यायान् पन्था:। अतएवं त्रयाणां मीमांसकानांविचारपक्षमासाद्य विज्ञायते यत् प्रमात्वं स्वतोग्राहयमेवेति निश्चीयते।

अन्योषां विचारे तु घटत्वेन घटमहं जानामीत्याकारकसमूहालम्बनज्ञानाय तादृश सन्निकर्ष: नितरामयेक्षयते तेन तथा च- यत्किंचिद् प्रकारक प्रामाण्यस्य विषयघटितत्वेन तत् सम्पादनाय तादृश सन्निकर्ष घटित सन्निकार्षपरम्परायेक्षयालाघवसहकृतसिद्धानुमानग्राह्यत्वस्यौचित्येन परतोग्राहयत्वं न्यायमतानुसिद्धं मवेदेवेति निश्चयं प्रत्येमि।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तादृशसन्निकर्षानङ्गीतुकारेस्वतोग्राह्यत्वं मीमांसक विचार सिद्धैकदेशेनैवाङ्गी कर्तुं कोपि क्षमते। तेन भाट्टमतेऽपि ज्ञातोघट इत्यादिस्थले तदैशे क्वापि तज्ज्ञान निरूपित विषयत्वावगाहित्वाङ्गीकारेणैवतदुपपत्ति सम्भवतयातत् सिद्धिः।

तादृश पक्षसमुपपादने निर्युक्तिकतया तदसिद्धत्वेन कथं नैव सत्त्वं प्रतीयेत। अतएव तस्य स्वतस्त्वे प्रमाणावगाहित्वस्य प्रमाणशून्यत्वात्।

एवं घटत्वप्रकारकसमवायसंसर्गकघटविशेष्यक ज्ञानत्वस्यैव प्रमात्वेन मिश्रादिसम्मततथैवानुव्यवसाये समवायस्यानङ्गीकारात्। तद्घटित प्रमात्वस्य स्वतो ग्रहे सर्वथा प्रमाण शून्यत्वमेवावगच्छामि।

तादृशेप्रत्यासत्तिवलात् घटघटत्वयोरिव समवायस्य तादृशमानं स्वीकुरुते चेत्तदा सामानाधिकारण्यसम्बन्धेनप्रमेयत्वविशिष्टेघट इत्याकारक-प्रतीतिवलादेव सकलप्रमेयप्रकारकालैकिकप्रत्यक्षापत्तिः जायतेच, तस्यापि प्रमाणपरिपुष्टाभावदर्शनतयातादृशापत्तिःजायतेच, तन्यदथापि प्रमाण-परिपुष्टभावदर्शनतयातादृशापत्तिःसततंगगनकुमुमायमानतयैव समानाधि-करण्यघटकत्वस्याभावोपपत्तिमूलकत्वेसमस्तप्रमेयस्य संसर्गत्वमानं नैव-प्रमाणाभिसिक्तमित्यतोपूर्वप्रतिपादितवचनानां सर्व्थाऽनुपयुज्यमानत्वेन मिश्रपादानांकथनंयुक्तियुक्तमित्येवनितान्तं समुचितं प्रतिमाति । एतावता ज्ञानेप्रमाण्यमनुमेयमेवेतिसर्वथासत्यमेवेति। अतः ज्ञाननिष्ठोद्देश्यतानिरूपितानुमितिविधेयतावत्त्वमेवेतिप्रमात्वमवसेयभेवेति सिद्धमेव।

अतएव मूलकारः तमेवपक्षं प्रतिपादयितुं प्रयतते तथाहिइदंज्ञानं प्रभा संवादिप्रवृत्तिजनकत्वात् । यन्नैवं तन्नैवं यथाऽप्रमा, एवानुमानमपि तदपरत्वेन द्रष्टव्यमेवेति निर्षिवादसिद्धोयं पन्याः तार्किकप्रवराणाम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतएव मूलकार: तमेव पक्षं प्रतिपादयितुं प्रयतते तथाहिइदं ज्ञानं प्रभा संवादि प्रवृत्तिजनकत्वात्। यन्नैवं तन्नैव यथाऽप्रभा, एवानुमानमपि तदपरत्वेन द्रष्टव्यमेवेति निर्षिवादसिद्धोयं पन्या: तार्किकप्रवराणाम्।

न चैवं सत्यपितत्र हेतुज्ञानं कथं सम्पद्येत, कथंतुगन्धाधिकरणे पृथिवीत्वप्रकारक ज्ञानत्वात्मकादि हेतो: कथं भवेन्निर्णय: नितरां नितान्तं शान्तस्वान्तेनेति प्रामाणवरिष्ठानांतथेति। तथाचपक्षवृत्तित्वेन निर्णयाभावतया पूर्वोक्तानुमिति: नैव सम्पद्येत।

तादृशव्यवसायस्य पृथिवीत्वप्रकारकत्वेनानुव्यवसायज्ञाने तादृश व्यावसायस्यैव तन्निष्ठपृथिवीत्वप्रकारज्ञानत्वस्यापि स्वतोग्राह्यत्वात्। अतएवानुव्यवायेन तस्य हेतो: प्रमात्वसाध्यकत्वं निरावाधमेवेति सत्यमामाति।

गन्धप्रत्यक्षेसति तन्निष्ठ गन्धवद्विशेष्यकत्वस्यायि सुग्रहत्वात्। अनुव्यवसाय विषयत्वे वाधकाभावात्। तथाच पक्षे तादृश निर्णयस्य न प्रमात्वानुमित्यनुपपतिरिति विज्ञेम्। अतएव गन्धाधिकरणे पृथिवीत्वप्रकार-कत्वस्यतुल्यप्रमाणेन पृथिवीत्ववति पृथिवीत्व प्रकारकत्वात्मक प्रमात्वस्यापि अनुव्यवसायत्वेवाधकाभावेत्व प्रभात्वस्यानुमयेत्वस्य निर्वीजमेवेति सत्यं विभाति।

प्रथमत: दूरदेशीय सलिलादिज्ञानानन्तरं सर्वानुभवसिद्धतया जलत्ववद् विशेष्यकत्वविशिष्टजलत्वप्रकारकंजलज्ञानं वर्तते नवेति विशिष्ट धर्मज्ञान-प्रकारक संशयस्याऽप्रसिद्धत्वमेवेति। तने हेतुना तादृश विशेष्यकत्वविशिष्ट-तत्प्रकारकत्वं प्रमात्वंस्वीकर्तव्यमेवेति ज्यायान् समाचार:।

तादृशानुव्यवसायविषयत्वस्म तन्निश्चयात्प्राक्संशयोनास्त्येवेति निश्चयं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मन्ये। पूर्वप्रतिपादित तद् वद् विशेष्यकत्व विशिष्ट तत्प्रकार कत्वमेव प्रमात्वं स्वीकार्यमेवेति निश्चर्य प्रतीमः। तथासति प्रथमं तावदनुव्यवसायवाध्यं जायते, तदनन्तरं तत् सम्पादनायानुमानस्यावश्यकत्वं सर्वप्रमाणसिद्धमेवेंति ज्यायान् पन्था: वरीवृतीति।

नन्वत्र-

वास्तविकरूपेण प्रमात्वमेवच्छोद्याच्छेदकभाव विशिष्ट तद्विशेष्यकत्व तादृश प्रकारकत्वोभयत्वेनरूपेणस्वीकर्तव्यम्। तत्रैव तत्र पूर्वोक्त विशिष्ट प्रभात्वेन रूपेण स्वीकर्तव्यम्। तथाच विशृङ्खलितविषेण विशेष्ययोः प्रभात्वस्वरूपयोः स्वतः ग्राह्यत्वं संभवति। तेन न्यायामिमतानुभान ग्राह्यत्वकल्यनं नैव साफल्यमाकलयितुं क्षमते।

तत्र पूर्वकालिकदूरादवलोकित ज्ञानानन्तरं सर्वानुभवसिद्धतया सलिलत्ववद् विशिष्टविशेष्यकत्वविशिष्टप्रकारकत्वमेव स्वीकरणीय मेवेति नितरन्तं सत्यमाभाति। अतएव तादृश जलज्ञानं विद्यते नवेति संशयः तेन संमवति। एतावता विज्ञायते यत् तादृश विशेष्यकत्व विशिष्ट तत्प्रकार-कत्वमेव प्रभात्वं स्वीकर्तव्यमेवेति विज्ञातंभवति। तेनतत्सम्पादनायानुमानं परमावश्यकंप्रतिभाति।

नन्वत्र-

धर्मितावच्छेदकसामानाधिकरणप्रत्यासत्त्या प्रामाण्यावगाहित्वस्य स्वीकार्यतया धर्मितावच्छेदकावच्छेदेन प्रामाण्यावगहभविशिष्ट सामानाधिकरण्यस्यतादृशसंशयविरोधित्वाभावात् प्रमाण्यस्य स्वतो ग्राह्यत्वेऽपि संशयानुपपत्तिः स्यादेवेति चेन्न। तात्कालिका नुव्यवसायसामान्यस्य सामानाधिकरण्यतया प्रमाण्यावगाहित्वेनोत्तरं जायमान संशयसामान्यस्य तदधिकरणमर्यादया तद्प्रामाण्यावगाहित्वे प्रमाणाभावात्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतएव प्रामाण्यस्यानुमेयत्वे तदवदिव तदपरानुव्यवसाय संवेद्यत्वमपि संभवत्येवेति निश्चयः। तथाच सलिलभवगच्छामि प्रतीति प्रत्यय संवेद्यानुव्यवसायोत्तरं सत्यां प्रवृत्तौसलिलमानेतुं सवायेन जलत्वेन सलिलं जानामि तदनन्तरंतदनुव्यवसायोत्तरं तत्परानुव्यवसायः समवायेन जलज्ञानानामुपस्थितिवलात् जायतएवेतिनिश्चयः।

तस्मात् तादृश विचारसिद्धप्रामाण्यमपितद विषयत्वेन प्रतीति प्रत्ययाभ्यां संसिद्धएवेति निश्चिनोमि। तत्र प्रतिपादितलिंगेन पूर्व कालिकानुव्यवसायोत्तरसमकालीनप्रमात्वानुमित्युत्तरजलत्वादिप्रकारका भावान् तावदहमित्यनुव्यवसायः संभवत्येवेति निश्चयः।

अथ प्रभाकरमते ज्ञानसामान्यस्य समस्तस्य याथार्थ्ये समे सतनां ज्ञानानां तवदथाऽव्यमिचारित्वं विद्यतएवेति निश्चयः।

अथसमेषाज्ञानानां याथ तथ्यतयप्रमालक्षणे तद्विशेष्यकत्वविशेषणं व्यर्थमेवेति सत्यं प्रतिभाति।

तद्वद् विशेष्यकत्वस्य तादृश तत्प्रकारकत्वज्ञानत्वव्याप्यत्वेन सर्वस्मिन्स्थले तत्प्रकारक ज्ञानात्मक प्रभात्वस्वीकारेणैव निर्वाहे तदविशेष्यकत्वविशेषणंव्यर्थमेवेतिविदुषांसंवादः। तादृशं स्वतो ग्राह्यंन्याय सिद्धान्त विचारानुसारमपि संभवति।

अतएव तद्विशेष्यकत्वविशेषणं व्यर्थमेवेतिसार्वजनीनः यन्थाः। किन्त्वत्र समेषां ज्ञानानां याथार्थ्यतया राजतार्थिनः पुरुषस्येदन्त्वेन रंगविशेष्यक रजतत्वप्रकारकज्ञानजन्या, रंगे रंगविशेष्यकरजत्व प्रकारिका-प्रवृत्तिः नोत्पद्यते। मीमांसक विचारेण रंगविशेष्यक रजतत्व प्रकारकाभावेन तादृशेच्छानुत्पत्तौ नैवप्रवृत्तिःदृश्यते। केनापि प्रकारेणान्थातत्रप्रवृत्तौ कारणभेदं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकल्प्य भ्रमाभावः तथापि न कापि हानिरपिस्यादिति वाच्यम्। इदन्त्वेन रङ्गगोचररजतार्तितत्वप्रकारक प्रवृत्तौ दोषाधीनस्य पुरोवर्तिनिस्वातन्त्र्येण समुपस्थितरजतभेदाग्रहस्य तत्र हेतुत्वात्।

एवं च दोषात्मक प्रतिबन्धात्मक दशायां तद्विरहात्मक कारणाभावेन भेद प्रकारक प्रत्यक्षस्य विद्यमानत्वमेवेति नैसर्गिकतयैव निश्चयः। अतएव तस्यां कारणकूटस्योपस्थितिदशायां तादृशभेदस्य निश्चयः विदुषां निवहेन सर्वथा चोररीकृतः। सत्यरजते चाकचिक्यप्रभाववैलक्षण्येन तदघटितस्यरजतभेदाग्रहस्यविद्यमानसमयेतादृशभेदप्रकारक प्रत्यक्षारया-विद्यमानवेलायां तत्प्रवृत्तेः नैवोत्पत्तिः।

अतएवोक्तं मूल कारेण यत् रजतभेदाग्रहस्य स्वातन्त्रेणैव तत्रांगीकारात्। तथा चेत्त्थं कार्यकारणभावोवाच्यः- विशेष्यतासम्बन्धेन रजत्व प्रकारक प्रवृत्तिं प्रति एककालाषच्छेदेन समकालावच्छिन्नैकात्मवृत्तित्व सम्बन्धेन, इदन्त्वावच्छिन्नोयस्थिति रजतोयस्थितिद्वयविशिष्ट रजतभेद प्रकारक ज्ञानत्वावच्छिन्नविशेष्यतासम्बन्धेनतदवच्छिन्न प्रतियोगिताका भावत्वावच्छिन्नस्य दैशिकविशेषणतासम्बन्धेन कारणत्वपरमावश्यकमेवेति स्वीकार्यपेवेति विद्वद्भिः।

अतएव दीर्घतरकार्यकारणभावस्वीकार्यतया नास्तिकल्पना प्रसारदोष विचारावसरः समुयसर्यति ।

कन्थं तु फलमुख गौरवस्य नास्तिदोषानर्हत्वं स्वीकुर्वतेविद्वन्मण्डलानि।

नन्वत्र प्रवृत्ति सामान्ये तादृश भेदाग्रहस्य कारणत्वेन सति रजत भेदस्थले तस्यानुपस्थितत्वेन् नेदंरजतमित्याकारकभेदस्यविद्यमानतया तादृश विचारस्याऽर्थ समाजग्रस्ततया, इदन्त्वावच्छिन्न विषयकोयस्थिति रजत भेद शब्दोपस्थितिद्वयभेदकालेऽपि प्रवपृत्त्यापत्तेः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सामान्यतया प्रवृत्तिंप्रति पूर्वोक्तमेदाग्रहस्यकारणत्वमस्तीति जानन्त्येव समे। तत्र नास्तिकेषांसमवलोक्यतेमतभेदः। परन्तु रजत भिन्नस्थले सत्यपिजायमाने रजतमेदाज्ञानस्य तत्र विध्यमान तयापि तावत् नैव रजतमित्यादिप्रतीतिप्रत्ययाभ्यां संवलितत्वेनापि न्यायाभिमत सिद्धस्यसत्त्वेनापि तत्संम्पन्नतया, इदन्त्वावच्छिन्नविषयकोपस्थितिविशिष्ट रजतमेदोपस्थिति समयेऽपि स्यादेव प्रवृत्यापत्तिः । अतएवानान्यथाख्यातिः स्वीकार्येति विदुषांविमर्शः। तदनङ्गीकारे रजते कथितमेदाग्रहस्य वर्तमानत्वादिति सत्यंप्रतिभाति । किन्तु तादृशकथनंनोययुस्क्तं । रजत मेदाग्रहात्मकवाक्यघटकतादृशभेदग्रहस्य रजतभेदस्य ग्रहोयस्मादिति व्युत्पत्त्या रजतमेदाभावग्रहस्य विरहएव तादृशप्रवृत्तिंप्रति प्रतिबन्धको भवत्येवेति निश्चयः।

हेतुनाऽमुना रजतमेदाभावः प्रवृत्तिंप्रतिकारणमितिज्ञायतेधीमता तार्किक प्रकाण्डपण्डितेन।

समुपस्थित्यामस्यां तादृशभावएवतां प्रवृत्तिं प्रति कारणंजायत एवेति निश्चयं प्रत्येमि।

अतएवेत्थं कार्यकारण भावो वाच्यः-

विशेष्यतासंसर्गेणप्रवृत्तिसामान्यं प्रति एककालावच्छिन्नोत्तर जायमानैकात्मवृत्तित्व सम्बन्धेन रजतविषयकोयस्थितिविशिष्टस्यविशेष्यता सम्बन्धावच्छिन्न रजतभेदा ग्रहत्वावच्छिन्न प्रतियोगिताका मावस्य दैशिक विशेषणता सम्बन्धेन प्रतिबन्धकत्वं जायते ।

अथच विशेष्यता सम्बन्धेन प्रवृत्तिसामान्यंप्रति एककालावच्छिन्नैकात्म-वृत्तित्वसम्बन्धेनतादृशोपस्थितिद्वयविशिष्टस्यविशेष्यता सम्बन्धावच्छिन्नता-दृशप्रतिबन्धकीभूताऽभावत्वावचच्छिन्न प्रतियोगिताका-भावस्य तादृश

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विशेषणतासम्बन्धेन हेतुत्वं वरीवर्ति। तेन हेतुना नेदं रजत मित्यत्र निरूक्तप्रतिबन्धकत्वात् । नात्र तथा दृश्यते प्रवृत्तिः। रंगविषयकेदं रजतमित्यत्र तदुपस्थिविद्वयसमकाले रंगे तादृश प्रवृत्ति समुपपादनाय प्रतिबन्धकीभूताभावे रजतभेदोपस्थिति वैशिष्स्य प्रवेशः।

किंच प्रभाकरविचारे रजते तत्र मेदाग्रहाभावस्य विद्यमानत्वात् अन्यथाख्यात्यापत्तेः।

यद्यपि तादृशपुरोवर्त्ति विशेष्यकस्य रजत मेदा संसर्गग्रहस्य समवाय सम्बन्धेनाभावो विशेषणतयाऽऽत्मनिष्ठः प्रतिबन्धकस्तदभावः कारणं भवतीति विज्ञायते तार्किक प्रवरेणेति।

अतएव रंगे नेदं रजतमित्याकारक ज्ञानेऽपि प्रवृत्यापत्तिः सुस्थिराभवेदेवेति निश्चयः। कथतुं रंगविशेष्यकरजतमेदासंसर्ग ग्रहस्यान्यथाख्यात्यनङ्गीकारेतदप्रसिद्धत्वेनतदभावस्यप्रतिबन्धकत्वा सम्मवात्।

तथापि विषयता सम्बन्धेन प्रवृतिंप्रति रजतमेदासंसर्ग ग्रहस्य विशेष्यता सम्बन्धावच्छिन्न प्रतियोगिताकाभावो विशेषणता सम्बन्धेन जायत एवेति प्रतिबन्धकः। अतएव विषयनिष्ठत्वेन प्रतिबध्यप्रतिबन्धकभावकल्पनात् नोक्तदोषःसमम्युपैति।

भ्रमप्रभा साधारणस्थले सामान्यतया प्रवृत्तिं प्रति प्रतिपादित मेदाग्रहत्वेन हेतुत्वमस्ति । तदपेक्षयालयुत्वेन तदवच्छेदकप्रकारक ज्ञानत्वेन हेतुत्वं विद्यते, तदेवंचयुक्त्या कारणत्वमस्ति। तेनतत्रप्रथम भ्रमं निराकरोति । अतः मूलकारस्तु तदित्थं व्याचष्टे यदन्यथाख्यातिः सर्वथा सर्वदा समैः स्वीकार्या। न यथा ख्यातिः अन्यथा ख्यातिः अतद्धर्मवत्तया प्रतीतिः भ्रमएवेति संगिरते तर्कताण्डवलीलावतारः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रजतत्वप्रकारक प्रत्यक्षोत्पादकस्य तादृशप्रयोजकस्य तादृशतद्घटितं चक्षुः संयोगविशिष्टसमवायस्यरजत्वविशिष्टेअविद्यमानत्वात्।

एतावता विज्ञायते मया यत् सन्निकर्षविरहदशायां रङ्गत्वविशिष्टे रंगे राजत्व प्रकारक भ्रमस्यानुत्पत्या तादृशेष्टतावच्छेदकरजतत्वप्रकारक ज्ञान विरहेण कारणत्वस्याविद्यमानप्रवृत्यात्मक कार्यस्य व्यतिरेकव्यमिचार-वलादेवेष्टतावच्छेदकप्रकारकज्ञानस्यकारणत्वं सुतरां संसिद्धमेवेति निर्विवाद एवेति प्रतिभाति। कथं तर्हि तत्रान्यथाख्यातिः संभवति।

यदि च रजत्त्वेन रङ्गं जानामित्यादिरीत्यानुव्यवसायस्य नितरामन्यव्याख्यातौप्रमाणस्यविद्यमानदशायांतादृशनिश्चस्यसच्त्वमास्त्येवेति साधीयान् विचारः समम्युपैति।

तथा च मीमांसकविचारमनुसृत्यतादृशानुव्यवसायस्य रजतत्व प्रकारकत्वविशिष्टमेदाग्रहसमकालीनतत्प्रकारकत्वोपस्थिति विशिष्टरङ्ग विषयक ज्ञानोपस्थितित्वस्य स्वीकार्यतया नैव तादृश विचारं साधयितुं क्षमते कोयि।

प्रत्यक्षप्रमाणेनासिद्धस्यापि तादृशशानुमानेन साधयितुं प्रयतते ।

अथ तथापि अन्यथाख्यातिपदार्थसाधनाय समाधानमुखेन तादृश प्रयासं विधत्ते।

रजत प्रत्यक्षोपपादकस्य रजतेन्द्रियसन्निकर्षस्याभावतया रंगे रजतबुद्धेः सर्वथानुपपत्तिरेव समागच्छति। कथं तर्हिरंगेरजतबुद्धिःसम्यद्येत। अतएव तादृशाचार्याणां विचारचातुर्यमाणयटलेन समाच्छन्नमेवाभाति।

रजततत्वप्रकारकरजतविशेष्यक प्रवृत्तिंप्रतिविशेष्यतासम्बन्धेन विशिष्टज्ञानस्य लघुधर्मावच्छिन्नकारणताायः निर्विवादतया रंगविशेष्यक

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रजतत्व प्रकारक ज्ञानहेतुत्वस्य किंवारंगनिष्ठविशेष्यतासंसर्गेण रजत्व प्रकारकज्ञानहेतुत्वस्यच कारणत्वं सिद्धमेवेति ज्यायान् विचारः समम्युपैति।

एवं च विसंवादि प्रवृत्तिः- पुरोवृत्ति विशेष्यकेष्टतावच्छेददक प्रकारक ज्ञानसाध्यप्रवृत्तिजनकत्वात्। संवादि प्रवृत्तिवदित्यमुमानेन तावदन्यथा ख्यातिः सिद्धत्येव।

तादृशस्थले ज्ञानलक्षणाप्रत्यासत्त्यातस्य भानं भवेदेवेतिविश्चयः।

अत्र केनापि पूर्वपक्षवादिना महाभागेनोच्यते यत् व्यभिचारित्वस्य सन्दिग्धतया संवादिप्रवृत्तौकारणं भवेदितिपक्षं समालोच्याशंकते किल-विशेष्यतासंसर्गेण रजते इष्टतावच्छेदकप्रवृत्तौतदिष्टतावच्छेदकप्रकारक ज्ञानं तादृशनियमपूर्ववर्त्तित्वेनतदुभयविचारसिद्धत्वात्।

नन्वत्र संवादिप्रवृत्तौ तस्यकारणत्वं स्वीकर्तव्यव्यमेवेति, किमधिकेनेति विदुषांविचारसन्ततिः।

विशेष्यतासम्बन्धेनतादृशावच्छेदकप्रकारकंज्ञानंकारणं संवादि प्रवृत्तिनियतपूर्ववर्तित्वेनतदुभयमत संसिद्धतया तदेवेत्त्थं मीमांसक विचारसंगि्त्वमेवेत्यो तदनुकूलजनकत्वेनान्यथाख्यतिपदार्थस्य विचारासहत्वेन नैव ते तादृशं सर्वदासमम्युपगच्छन्तीति निश्चयचम्।

मूलकार विचारपक्षं समवगत्यान्यथाख्यातौप्रत्यक्षमेवप्रमाणं रजतत्वेन तादृशविचारसायेक्षंसुतरामवेदिषम्।

तादृशानुभव सिद्धतयातस्यान्यन्याख्यातिः निष्प्रत्यूहैवेति सिद्धयति ।

अत्रकेचिद् मध्यास्थाः विचारचर्चामाकलयन्तोतदित्त्थं निश्चिन्वते स्वविचार यक्षं यत्-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रज्जौ यथाहेर्भ्रमः'' इत्यनया पद्धत्या सर्वस्यकौटिल्यतया दूरादेवेऽवलोकितगाढान्धकारसंक्रान्ततया तदभावविशिष्टेभवति च रज्जौ सर्य भ्रमः प्रमाणप्रतीतिप्रत्ययवलेन संजायते। तथात्रापिप्रतिपादित रीतिमनु-विमृश्यान्यख्याति पदार्थ सम्बन्ध सौन्दर्येऽपि रीतिरियं चकाशते।

अतएवात्रनैवशङ्काकलङ्कायनोदनविधानावसरः केषांविचारे समुपसर्यति। नात्र केषां वैमत्यं जायते।

अत्र केचनशून्यवादिनस्तु माध्यमिकाः संगिरन्तेस्ववचनविलासम् यत्—

असत्ख्यातिवादिनः यथाप्रमाणपटलैःसमाच्छनन्नविचार कौतुकाहलादसमन्वितमुदन्तं निमालयितुं कल्पना कौतुकं प्रयततेः। अतएव खण्डनमण्डनविचाराऽम्बरपटलैःसमाच्छन्नमिदं प्रमाणजगतीतलं व्याकुलत्वंसमम्युपैति।

किन्तु तदितरे सम्पद्यामानाक्षचरणाः किं विधातुममिलषन्ति तन्न जानन्ति तार्किकचणाः।

तदितरे क्षणिकवादिनस्तुतद्वैयरीत्यमेववचनविलासं संगिरन्ते। नैयायिकानां राद्धान्तेतु अन्यथाख्यातिपदार्थनिरवधिकल्वेनचोररीकृतः तावद-क्षपादविचारभूषणभूषितेनगंगेशमतानुयायिना महता महताऽऽऽम्वरेणेति ।

मणिकार विचारसहकृत नव्यनैयायिकविचारपरामर्से सर्पाभावव तिरज्जौदोषप्रावल्यतया सर्पस्यभ्रमात्मकं ज्ञानं समुयजायते तदेवान्य व्याख्यातिपदार्थतत्वमुद्गिरन्ते गंगेशयथानुयायिनः। मीमांसकानां विचारेतु सर्पस्मरणविशिष्टं यत् रज्जुप्रत्क्षात्मकज्ञानद्वयात्मकत्वेन ज्ञानं वोभवीति, तज्ज्ञानमेववान्यथाख्यातिपदार्थतत्त्वं नव्यन्यायजगतीतले वरीवर्ति। अतएव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मुक्तावलीकारः अन्यथाख्याति पदार्थं व्याचष्टुं प्रक्रमते।

मीमांसविचारमादृत्य पूर्वपक्षतयातमेव पदार्थं शङ्केस्त्तरमावेन परपक्षप्रतिषेधमुखेनान्यथाख्यातिपदार्थतत्त्वं व्याचष्टुं प्रयतते नव्यनैयायिकः। तादृशस्थलेप्रभाकराचार्याणांसम्प्रदायेरजतत्त्वविशिष्टेरजते नेदंराजतमि-त्याकारकमेदनिश्चयाभावस्यवर्तमानत्वेनस्वाभाविकएव तत्रान्थाख्यातपत्तेः। ख्यातिस्तु लोके व्यवहारसमये वैशिष्टयप्रतिपादकं वचनमेव। नख्यातिः, आख्यातिः, आख्यार्तिर्वेति। आख्यातस्य विचारस्तावदन्यथाख्यातिपदार्थः न्यायजगतिप्रसिद्धिभावहति। लोकेवेदेशास्त्रे च यस्ययदार्थस्पाऽसत्त्वेन प्रतीतिर्जायते, सएवान्यथाख्याति पदार्थः । एतावता पूर्वोतरभाव कथनेनावगभ्यते यत् रज्जौ सर्पस्य कौटिल्ये दोष समाकलनेन भ्रान्तिःजायते, भ्रमात्मकज्ञानंसंजायते, सएवान्यथाव्याख्यातिपदार्थः। वचनेनामुना विज्ञातंभवति यत् भ्रमएवान्यथा ख्यातिपदेनविज्ञातव्यः-तत्त्वविदा प्राज्ञिकेन।

मीमांसकानां विचारमधिगम्य रजतत्त्वविशिष्टे नेदं रजतमिति घीः वेलाायं वादृशान्यथाख्यातिपदार्थव्यवहारःसमुपपद्यते समेषांकृते। तत्रैवेष्टसाधनत्वस्य प्रतीयमानत्वेन तस्य व्यवहारः प्रतिभाति श्रेयकरः।

तत्र विद्यमान विशेष्यतानिरूपितरजते नेत्याकारकसंसर्गग्रहस्य समवायसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्यविशेषणतासम्बन्धेनात्म-निष्ठतया प्रतिबन्धकत्वं स्वीकुरुते, एवं च कार्य मात्रं प्रति प्रतिबन्धक संसर्गाभावस्य कारणं विद्यत एवेति निश्चिनुते मीमांसकः।

वह्निव्याप्य धूमवन्नेत्याकारकभेदस्य ह्रदेऽग्रहतया ह्रदोवहिनमान् इत्याकारकानुमितिः यत्रवोभवीतितत्रान्यथाख्यातिरूपानुमितिः जायते नान्यत्र। किन्तु तत्राऽगृहीताऽसंसर्गकं ज्ञानद्वयंह्रदोवह्निमान् इत्याकारकं विध्यत्ते, तथा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

च तत्र नान्यथाख्यातिः सिद्धयति, प्रमाणप्रत्ययाभावात् । किन्त्वयोगोलकंवह्निमत् एवं च वह्निव्याप्य धूमवन्नेत्याकारकमेदस्य प्रत्यभामावत्वेन तादृशकारण कलायादेव तज्ज्ञानं कर्तुं शक्यमेवेति सत्यम् । किन्तु नैव तादृशं ज्ञानं क्वचिदपिभविष्यति। विशिष्टज्ञानात्मक कारणानुभवस्वीकारात् । अतएव कथमन्यथाख्यातिस्वीकारयोग्या भवेदिति। समस्तेषुप्रमाणेषु प्रत्यक्षप्रमाणस्यैव वलीयस्त्वेन मूले ग्रन्थकार वचनमिदं प्रमाणगुणगौरवगुम्फितत्वेन प्रत्यपादीत्। तदनन्तरंचान्यथाख्यातिः प्रत्क्षप्रमाणपरितुष्टासती लोचन पथेपथिकायमानाभविव्यतीतिकोप्याचार्य-तन्निश्चयंकर्तुं क्षमोभवेदिति।

यद्यपि सर्वत्र प्रत्यक्षप्रमाणपरिकलितमप्यर्थं सर्वदानुमानेनवुमत्सन्तेनि-तान्तमनुमानरसिकाःसदोयाध्याय चरणाः। तदुक्तं च-

यक्षता चिन्तामणौ मणिकारेणेति । नहि करिणि दृष्टे चीत्कारेण तमनु भिमते अनुमातार इतिवाचस्यतिवचनयोरविरोध प्रतिपादनात् । नात्र वैमस्त्यमाशासें केषां तार्किकवरिष्ठानामिति ।

अत्रेदमनुसन्येयं तात्यर्यविज्ञानं तार्किक वरिष्ठैः यत् अनुमान प्रामाण्य संवलितत्वेनं संजातभ्रमे वाध्यत्वेनान्यथाख्यातिपदार्थः प्रमाण प्रत्ययादिवचनैः कथं संसिद्धयेत्।

अनेन वचसान्यथाखतौ प्रत्यक्षमेव प्रमाणमित्यनुमानरसिकः, तस्मात् अनायत्यारंगे रजत्व प्रकारात्मकं ज्ञानप्रमाणेन स्वीकार्यमेवेति । तदपरेमनीषिणः स्वाभिप्रायंसंगिरन्तेकिल वह्निव्याप्य धूमवन्नेत्याकारक भेदस्य ह्रदेऽनिश्चयतया नैव ह्रदो वह्निव्याप्यधूमवन्नेत्याकारक भेदस्य ह्रदेऽमिश्चयतया नैव ह्रदो वहिममान् इत्याकारानुमितिस्तावदन्यन्याख्यातिस्वरूपासंभवति किन्तु अग्रहीत संसर्गाभाात्मकं ज्ञानद्वयं वह्निमान्ह्रदइत्यात्मकंकथं सम्पद्येत ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वह्निमदयोगोत्पकं तावदित्यादि स्थले वह्निप्याप्य धूम विशिष्टमेदस्य नितान्तमग्राह्यतयाकथं तदुत्पत्तिः संजायेत। समुपस्थितायामस्यां परिस्थित्यां प्रमाणस्याऽनिश्चयतया नान्यथाख्यातेः सिद्धिः विदद्ध्यात् ।

किन्तु न केवलं विशिष्टज्ञानकारणेनतादृशस्वीकाराऽनर्हत्वादिति विज्ञातव्यमेवेति समैः विद्वद्भिः। अन्यथाख्यातिपदार्थस्त्यानुभवः गगनकुसुमायमानमेवाचिरं सम्पद्येत।

अतः समुल्लसितेषुप्रमाणेषुप्रत्यक्षप्रमाणस्यवलीयस्त्वेन तस्यसंसिद्धि-प्रकारं तमेव शरणं करवाणि।

अनुमादिना हेतुना साधितेभ्रमेऽपि प्रत्क्षमेव प्रमाणं लोचन गोचरतामुपैतिप्रामाणिकः। रंगे रजतत्वप्रकारकज्ञाने समम्यर्हितमेव प्रमाणं वलीयः। तेन हेतुना प्रस्तुतप्रमाणस्योययुक्ततयासमुटङ्कितं वचनं चोररीकर्तुं शक्यमिति साधीयान् विचारः विदुषां तार्किकसम्प्रदायसिद्धानाम्।

केनापि विदुषांवरिष्ठेनोच्यते यत् तत्र द्वेज्ञाने प्रमाणत्वे नोययुक्तम्। एकं रङ्गस्य प्रत्यक्षात्मकं ज्ञानमेव परमप्रमोदास्यदंवरीवृतीति, तदपरं रजस्मरणात्मकं भविष्यतीति निश्चयं मन्ये।

वचनेनानेन नितान्तमवगच्छामियत्अन्यख्याथातिपदार्थपरिपालनाय तमेव प्रमाणपदार्थसिद्धान्तं निभालयितुं सुतरामनायत्या ग्रन्थ प्रदर्शित पन्थाः समादरयोग्यत्वं लभते । नान्यथा तदपरोमार्गः लोचनपथे समवतरति।

तेषु अन्यथाख्यातिपदार्थेषु वैलक्षण्यात्मकं प्रमाणयल्लवं प्रत्यक्षमेति वैशिष्टयं घत्ते। तेनान्यथाख्यातौ सम्पादन विधानचतुरः सत्सु साधन कूटेषु वैशिष्ठये केवलं चाक्षुषवमेवेति चोद्गिरन्ते विदुषांपङक्तयः। नातः परं किमपि तत्र मामकीनामतिरियं लघुयोग्यत्वं लामते विषयान्तरं प्रति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पित्सितमर्थानुधावनमिति।

अतःपरं प्रमाणपटलेन तावत्विज्ञायते यत्तथान्यथाख्यातौ प्रत्यक्षप्रमाणापलायसंसिद्धवचनानिलोचनं गोचरतां समुपयान्ति। नात्र शङ्का स्यदावसरः समम्युपैति बुद्धिमन्वीता महतां विचारचातुरीति।

तत्रेदंवोध्यं यत् मीमांसकानां विचारपक्षमादृत्य व्याप्यतावच्छेदक प्रकारकयक्षधर्मताज्ञानस्य तथानुमितिहेतुत्वेकपिसंयोगाभाव व्याप्यः मूलावच्छिन्नोवृक्षः इत्याकारक ज्ञानस्य प्रमाणमस्त्येवेनितिश्चयस्य वलवत्तरत्वं दृश्यते तार्किकप्रकाण्डेन विदुषंवरिष्ठेनेति निश्चयः।

तेनोवत्त प्रमाणेन विज्ञायते पत् भूलावच्छिन्नोवृक्षः कयिसंयोगीत्यनेनैव वचसा विज्ञायते यत् एतादृश्यानुमित्या पूर्वोक्तानुमानस्य प्रमाणपटलेन समाच्छन्नतयाऽन्यथाख्यातिपदार्थस्यसंसिद्धिः नितरां निष्प्रत्यूहैवेति सत्यमाभाति।

नन्वत्र-रजततया रंगमवेदिषमित्याकारकानुव्यवसायोनेदं विशेष्यकज्ञाने रजतत्वप्रकारकविशिष्टबुद्धिः किन्तुरजतत्वप्रकारकत्वाऽसंसर्गग्रहात्मकः अपितु मूलावच्छिन्नवृक्षेऽपि कपिसंयोगऽसंसर्गग्रहाभावरूपानुमितिरपिवोध्या।

तथानान्यथाख्यातिः सिद्धयतिसत्यंचेत् नाशङ्कनीयं केनपि विदुषां तल्लजेनेति विभावनीयम् । परेतु—तादृशंकथनंनैवयुक्तियुक्तम् । कथंतु प्रमाण पंक्तौ तथाऽनुल्लेखात् । पश्यामिरजतखण्डम्—अनुमिनोमि कयिसंयोगम् जानामि गवयपदाच्स-शाब्दयामि वह्निकारण कत्वमित्याकारकानुव्यवसायात्। तदनङ्गीकारेप्रत्यक्षादि प्रमाण विमाजक धर्म चतुष्टयानामसिद्धयापत्तेः। नचेष्टापतिं- स्वीकर्तुमशक्यमेव। तथासति सकल निगमागमराद्धान्तवचन विरोधायत्तेः। प्रमाणान्तरराद्धान्तवचनविरोद्यापत्तेश्चेत्यनुज्ञेयमेव।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तथानुव्यवसायानुरोधप्रामाण्यवशादेवतदनुरोधेन च नितरामवश्यंस्वीकर्तव्या-ज्ञानलक्षणा। अतएवेति विचार मानस-मन्दिरे समवधायान्यथाख्यातिः निष्प्रत्यूहैवेति विज्ञाव्येति हृदयंव्यनदक्तिमे। अवसाने च—

रजतत्व निष्ठप्रकारता निरुपित रजतनिष्ठ विशेष्यताविशिष्टप्रवृतिं प्रति, किं विशेष्यता सम्बन्धेन रजतत्त्व प्रकारक ज्ञानस्य लघुभूत धर्मावच्छिन्न कारणतायाः नितरामन्वयव्यतिरेकाभ्यांतदुमयसाधारणप्रत्यक्षप्रमाण सिद्धत्वेन तत्कल्यनात्। रंगविशेष्यक रजतत्वप्रकारक प्रवृत्तिं प्रत्यपि रंगनिष्ठविशेष्यता सम्बन्धेन राजतत्व प्रकारक ज्ञानस्य कारणत्वं प्रमाण प्रत्ययादिभिः अनुमानादिना च निष्प्रत्यूहैवेतिसिद्धमेवेति।

पुरोवृत्ति विशेष्यता वच्छेदक प्रकारजन्या विसंवादि प्रवृत्तिजन्या किं वा तदिष्टतावच्छेदकप्रकारजन्यावेति प्रवृत्तित्वात् । संवादि प्रवृत्ति जकत्वात्'' अननानुमानेन तादृशप्रवृत्तिजनकत्वेन वान्यथाख्याते संसिद्धिः। तत्रत्य स्थले ज्ञानलक्षणा प्रत्यासत्या रजततस्य भानं स्वीकरणीयमिति समैः प्राज्ञिकैः।

अत्र सन्दिग्ध व्यमिचारिजनकत्वेनपृवृत्तिहेतोरसाधकत्वमस्त्येवेत्यतो पुनरपि जिज्ञास्यते मत्—

संवादि प्रवृत्तावेव तस्य कारणल स्वीक्रियतां तावत् वचनमिदंनान्यत्रैवेति कथनमुपयुज्यते किम्? विसंवादिप्रवृत्तौतु मेदाग्रहस्मैव कारणत्वं तु युक्त्या सिद्धमेवेति सत्यं प्रतिभाति।

अत्रकेचिदित्थं प्रतिपादयन्ति यत् स्मृतिभिन्नज्ञानत्वत्मकानुभवत्व प्रवेशेतुतदपेक्षया ज्ञानत्वविशिष्टघटितस्यप्रमात्वं वक्तव्यम् । अतः स्मृति साधारणत्वेन तत्करणस्य प्रमाणान्तरत्वापत्त्या लोकेवेदे च व्यवहारदशायां प्रमाण व्यवहारौपयिकात्मकानुभवत्वघटितमेवसर्वदामन्यन्तेतान्त्रिकाः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वास्तविकंतु- विशिष्टवैशिष्टस्य ज्ञाने विशेषणतावच्छेदकप्रकारक-ज्ञानस्यकारणत्वेन तज्जन्यतावच्छेदकान्त:पातिप्रविष्टत्वेन तादृशानुमानत्वस्य जातिविशेषतयाप्रतिपादनेनैवसर्वसामञ्जस्ये तादृशज्ञानस्यानुभवघटकत्वे-ननानुमवत्वस्यवैयर्थ्यामित्यतोतदमिप्रायेण व्याख्यातुंप्रायततमूलकार:।

प्रभाकराचार्याणांविचारेरजतत्वविशिष्टे भेदनिश्चयाभावस्य विद्यमानत्वे-नान्यथाख्यातत्वापत्ते:।

अतएव तस्यां स्थितौ रजतमेदाग्रहस्यैवकारणंत्वं स्वीकृत्य रजतमेद संसर्गाग्रहाभावस्यकारणंकल्प्यतामिति सर्वथासत्यं प्रतिभाति।

अस्तुवातत्रान्यथाख्याति: स्वीकार्यापरमावश्यकीवरीवर्ति:। नास्ति तत्र विचारभेद: दृष्टिपथे समागच्छति, तदा तस्यां स्थितौ अन्यथाख्यातिरेव सर्वमान्येति निश्चय:। तेन तत्र निश्चेतव्य: कार्यकारणाभाव:। अतएव तादृशं कार्यकारणभावं व्याख्याय गौरवप्रतिसन्धानदशायां निर्माय तादृश कार्य कारण भावंस्वीकारे गुरुत्वापत्ति: द्रष्टव्या।

तत्र कीदृश: कार्यकारणभाव: स्वीकरणीय:। आत्मनिष्ठप्रत्यासत्त्या किवा समानविशेष्यताप्रत्यासत्त्याचेति विवेचनीय:। तथा चात्मनिज्ञानम्, आकाशेशब्द:'' इत्याकारिका घी: समेषां विचारमन्दिरे समुत्पद्यते। सेयं सम्बन्धमन्तरा नैवभ वितुमर्हति। हेतुनाऽमुनाविज्ञायते यत् अस्ति कश्चिदुक्षयो: सम्बन्ध:। नहि सम्बन्धमन्तरा कापिविशिष्यबुद्धि:। अतएवानुमितिधूमेऽपि सन्निकर्षेण तादृशी मनीषा जायते। एंव च चक्षु: सन्निकृष्ठौ वहिननिष्ठाविषयता व्याप्तिज्ञानप्रयोज्या विद्यते, तथा पर्वतीय वह्नि संयोगनिष्ठाविषयता पक्षयर्मताज्ञानप्रयोज्यावीरवर्ति। पक्षधर्मताज्ञानेन जायते परामर्श:, तत: वह्निनिष्ठप्रकारतानिरुपितपर्वत निष्ठविशेष्यताशालिज्ञानं जायते। उपमितावपि गवयनिष्ठा विषतया चक्षु:

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सन्निकर्ष प्रयोज्या, गवयपदवाच्यवाचकभावसम्बन्धनिष्ठाविषयता सादृशज्ञानप्रयोज्यास्ति। तत्र वाच्यवाचक भाव सम्बन्धस्य सादृश्यज्ञानप्रयोज्यास्ति। तत्रवाच्यवाचकभाव- सम्बन्धस्य सादृश्य ज्ञानेन ज्ञायमानत्वेन प्रथमं तादृश:शाब्दवोध: संजायत एवेतिनिश्चय:। प्रातिपदिकार्थे स्वसमानविभक्तिकेनस्वाव्यवहितपूर्ववर्तिनापदेनोयस्थितस्यैव संसर्गमर्यादया च मासते।

विंशत्याद्या सदैकत्वे'' इत्यनुशासनप्रावल्यतया शतंब्राह्मणा:'' इत्यादिस्थले साधुत्वस्य विद्यमानतयापि वेदा:प्रमाणमित्यत्र कथं साधुत्वं संगच्छेत। विशेष्यविशोषणा:योअसति विशेषानुशासमे समान वचनकत्वं कथमिति साधुत्वजनकम्। इति हेतु: स्तदुद्भवेइति त्रय: समुदिता: हेतु:'' काव्यप्रकाशव्याख्याया:संगतित्वमितिकथनं प्रमाणप्रतीतिवचनै: समुपयुक्तं भविष्यति। इथ्यादिशंका सलिलप्रक्षालनंनैवसाधीय:। तथापि पूर्वोत्तरभावशंका समाच्छन्नतया तत्रापि समाधानवचनं नितान्तमनुसन्धाय समाधानवचनंन्यगा-दीत् मट्टाचार्य:।

विशेष्यवाचकपदयोरन्तरंतादृशविभक्तितात्पर्यविषय संख्या विरुद्ध-संख्याया: यत्रसत्त्वं तत्रैवाविवक्षितत्वं वरीवृतीतितत्रैवविशेष्य विशेषणायो: समानवचनकत्वनियमव्यवस्था प्रामाणिकीति दृष्टिगोचरायते। नान्यत्र।

त्रय: समुदिता: हेतु'' इत्यत्र हेदुपदं कार्योत्पादकतावच्छेदक समुदायत्वावच्छिन्नपरं तादृश समुदायात्वान्विमेकत्वं तदवचनार्थ:।

काव्योत्यत्तिप्रयोजकताच शक्तिनिपुणताभ्यासानां त्रयाणांसमुदायो्स्तीति प्रयोजकतावच्छेदकं समुदायत्वं तादृश समुदायत्वावच्छिन्नसमुदायपरम् तथा च तादृश हेतुपदं समुदायत्वे एकत्वान्वय: नितान्तं कर्तव्य:

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतएव शक्त्यादीनां त्रयाणां तृणारमणिन्यायेन हेतुत्वशङ्काया: नावकाश: दृष्टिगोचरोभवति। तेन कार्योत्पादकतावच्छेदकंयदेकं समुदायत्वं तदाश्रयत्वं न स्यादिति तात्पयें निश्चिनोमि। अतोनकारण प्राधान्यत्वेन एकैक समवधानतयापि काव्यनिर्माण कार्योत्पाददशायां तृणारमणिन्याये नैव हेतुत्वं भवेदेवेति मन्तव्यम्।

तथा च हेतु:'' इत्य त्रैकवचनं कथं युक्त्या युक्तं भवेदिति। तस्मात् शक्त्यादीनां त्रयाणां कार्योत्पत्तिप्रयोजकतावच्छेदकसमुदायाश्रयत्वं स्वीकारणीयं वचोविद्यानं प्रमाणसम्मतं भवेदिति विमावनीयम् । तदनन्तरमेव तादृशसमुदायत्वे एकत्वविशिष्टेएकवचनार्थैकत्वस्यान्वय: स्यादिति नात्रकश्चन शंकावतार: केषां विदुयां पुरत: समागच्छेदिति ममेयं मति:।

एवं घटोनीलोघट:'' दण्डवान्रक्तदण्डवान् इत्यादिस्थलेनीलघटामेदा-न्वयावगाहनेन दण्डवति रक्तदण्डवदभेदान्वयावगाहनेन नवीनै: विशेषे कोटावधिकावगाहिन: शाब्दवोधस्यखीकार्यतया घटो नीलघट:'' इत्यत्राऽभेदसम्बन्धावच्छिन्न नीलत्वावच्छिन्न घटत्वावच्छिन्नप्रकारतानिरूपित घटत्वावच्छिन्न विशेष्यताक: शाब्दवोध: संजायते। तत्र प्रकारता वच्छेदकं विशेष्यता वच्छेदकमेकं घटत्वमेव भवति, तथाघटोघट: इत्यत्रापि घटत्वमेव प्रकारतावच्छेदकं विशेष्यतावच्छेदकमपि जायते, तेन हेतुना अभेदसम्बन्धावच्छिन्न घटत्वावच्छिन्न प्रकारता निरूपित घटत्वा नच्छिन्न विशेष्यताक:शाब्दोध: कथं भविष्यति शंकाव्याजमुखेन कथं न भवेदिति प्राश्निकत्वामिप्राय: नेत्रपथे समागच्छति। एवं यथा दण्डवान् रक्तदण्डवान् इत्यत्रापि- अमेदसम्बन्धावच्छिन्न रक्तत्वावच्छिन्न दण्डवत्वावच्छिन्न प्रकारता निरूपित दण्डवत्त्वावच्छिन्न विशेष्यताक: शाब्दवोध: जायतएवेति निश्चय:।

तेन दण्डवान् दण्डवान् इत्यत्रापि दण्डवत्वमेव प्रकारता वच्छेदकं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विशेष्यतावच्छेदकमपि। तस्मात् दण्डवान् दण्डवान् इत्यत्रापि- अभेद सम्बन्धावच्छिन्नदण्डवत्त्वावच्छिन्न प्रकारतानिरूपित दण्डवत्त्वावच्छिन्न विशेष्य ताकः शाब्दवोध कथंन सम्पद्येत्।

घटो नीलघट'' इत्यादौनैवघटे शुद्धघटस्यामेदानेयः किन्तुनीलघटस्यैव, तथा च विधेयकोटा वधिकावगाहिनः शाब्दवोधः नवीनैः स्वीकारात्। कथं तर्हिघटांद्यशे विशेषणतावच्छेदक विधया नीलादिमान् नियामक नीलद्युपस्थिति तात्पर्यज्ञान विशेषादिघटित सामग्रीघटत्वाद्य-वच्छिन्नविशेष्यकनीलघटत्वाद्यवच्छिन्नविशेष्यक नीलघटत्वाद्यवच्छिना-मेदान्वयवोधप्रयोजिकाविद्यते। एत्रतादृशब्दवोध प्रयोजिकानास्ति तादृशवोध-प्रयोजिका मावादेव घटोघटः'' इत्यत्र तादृशशाब्दवोधापत्तिः दृश्यते। तदित्त्थं कोचिद् विव्दांसःसंगिगन्ते।

घटोनीलोघटइत्यत्रनील पदार्थस्य मानेनैव नियाम कत्वं वेवेद्मि। नीलपदजन्य नीलोपस्थितिनीलविषयकतात्पर्यज्ञानस्यकारणवशादेव तादृश-नियामकसामग्र्याः घटे अमेदवसम्बन्धेन नीलघटस्य भानमुयजायते। नीलपदसममिहारस्य तत्र प्रयोजकत्वं विज्ञायते।

घटो घट'' इत्यत्रतादृश सामग्रीविरेहण नीलमाननियामक सामग्री विरहप्रयुक्ततयाऽमेदान्वयवोधोनावलोक्यते। एवमन्यत्रापि तादृशामावेनैवा-मेदान्वयवोधो न भवति।

एवं च नीलयवत्वस्यत्वस्यैव भेदान्वयवोध प्रयोजकलं स्वीकुरुते चेत् तदा घटोघटः ''घटः पीतोघटः'' इत्यादावपि तथान्वयवोधस्य विद्यमानत्वं कथं भवेदिति जिज्ञासा समुत्थितैव दृश्यते। यतोहि नीलपदाभावात्। तर्ह्यपि घटोनील घट इत्यादिस्थले नीलत्वादि धर्मोपस्थापकसामग्री सत्त्वस्यैव तादृशामेदान्ववोधस्यैव नियामकत्वं विज्ञायते नान्यत्रेति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतएवान्वयवोधस्य तादृश कारणकूटस्य विद्यमानत्वे समुत्पादक त्वं नितान्तं युक्तियुक्तं समवगच्छामि।

अथापि घटोघट: इत्यत्रोमेदान्वय वोधमपाकर्तुं ग्रन्थकार: पूर्वयक्षत या पुरभपि जिज्ञासामारमते अथेत्यादि ग्रन्थेन। द्रव्यं घट इत्यत्रामेदसम्बन्धन्यावच्छिन्न प्रकारता निरुपित विशेष्यताशालि शाब्दवोधस्य दृश्यमानत्वेन घटोघट इत्यत्रापि तादृशान्वयवोध: कथं न सम्यद्येत।

धर्मितावच्छेदकसम्बन्धेनप्रसिद्धान्वयवोयस्य शुद्धघटत्वाव प्रकारकान्वयवोधस्यामेद सम्बन्धावच्छिन्न प्रकारतानिरूपित विशेष्य ताकशाब्दोधस्य दर्शनेनात्रापि तादृशान्वयाभेदसंसर्गकस्यवोध:कथं नस्यादिति जिज्ञासांमानसविचारमन्दिरेसमुपधाय तत्रान्वयवोध: स्वीकर्तव्य:।

इत्थं च कार्यतावच्छेदककोटौ धर्मितावच्छेदकनिवेशामाव प्रयुक्त लाघवमूलकत्वेन विषयनिष्ठ प्रत्यासत्त्याशाब्दवोधकारणयो: कार्यकारण भावं प्रतिपादयितुं मूलकार: स्वकीयं ग्रन्थमवतारयतिभट्टाचार्य:—यत्।

आत्मनिष्ठ प्रत्यासत्त्या विषयनिंष्ठ प्रत्यासत्त्याचेत्यतो द्विधाकार्यकारण भाव:।

आत्मनिष्ठ प्रत्यासत्त्या नाम शाब्दवोधात्मककार्यस्य तत्कारणी भूतो पस्थितियोग्यताज्ञानादिनांज्ञानस्वरूपतया समवायसम्बन्धेना शाब्दवोध-कारणानि आत्मनि समवाय सम्बन्धे जायन्ते। एवं तत्रैव कार्याण्यपि संभवन्ति। समवायसम्बन्धेन शाब्दवोधं प्रति तेनैवोपस्थित्यादिकारणं कथनीयं भेवेति सार्वजनीन:। तेन घट विषयकोपस्थिति सत्त्वे तेनैव सम्बन्धे न तादृशस्थले विषयप्रवेशस्यौचित्यं दृश्यते । अनेनकार्यकारण भाव वैचित्र्य-मर्यादयाघटत्वावच्छिन्न प्रकारता निरूपित विषयताकशाब्दवोधंप्रति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तद्‌विषयकोपस्थिति:शाब्दवोधे कारणम्। अस्माद्धेतो: अनन्त धर्मितावच्छेदकानं तथानन्त विषयाणां प्रवेशेन गौरवमायतेत्।

तथान्यत्रापि समवायसम्बन्धेन ज्ञानंसर्वदा आत्मनि जायते, तेन हे तुना विषयता सम्बन्धेन ज्ञानं विषये समुत्पद्यते, तथा च शाब्दोधकारणानां ज्ञान-स्वरूपाणां शाब्दवोधकारणानांविषयतासम्बन्धेनविद्यामान तया विषय-निष्ठप्रत्यासत्त्या शाब्दोधतत्कारणयो: कार्यकारण भाव: तथानि यामकतया व मन्तव्य:।

परिस्थित्यमस्यां विषयताया:विभिन्नस्वरूपतयास्वस्मिम् स्थलेतादृशीगति: समुत्पन्ना जायत इति निश्चय एव कार्यकारण भाव: कल्पनीय एवोति सर्वद:ज्ञातव्य एवेति।

नीलोघट 'इत्यत्र शाब्दवोधस्तु विषयतासम्बन्धेन घटे जायते एवं धर्मितावच्छेदकावच्छेदकताख्यविषयतासम्बन्धेनघटघटत्वसमवायेषु जायते। अनयायद्धत्या प्रकाताख्यविषयतासम्बन्धेन नीलेजायते, प्रकारत-वच्छेदकताख्य विषयता सम्बन्धेन नीलनीलत्वयो: समवाये जायेत। अनयारीत्या अमेदसंसर्गताख्य विषयता सम्बन्धेननीलस्य घटस्य चा भेद संसर्गे जायते । घटघटत्व समवाये नीलनीलत्वसमवाये च तादृश संसर्गाणां समेपामेषां नीलोघट इति शाब्दवोधविषयत्वेन वोमवीत्येव निश्चिनोमि। एवं रीत्या समस्तेषु स्थलेषु शाब्दवोध: निर्विशेषेण नितरां नितान्तं विज्ञेय इति घीधनशै: समवगन्यव्य:। तथापि विषयतासम्बन्धावच्छिन्न-शाब्दबुद्धित्वावच्छिन्नं प्रति विषयता सम्बन्धेनोपस्थित्यादिकं कारणं स्वीकयम्। अत्र समवाय सम्बन्धेन देवदत्तात्मनिसत्यपि समुपस्थिते तदमिन्नस्य पुरुषस्य शाब्दवोधपत्ति: माभवतु, तन्निरासायतत्पुरुषीयत्व निवेशस्यौचित्याय, यज्ञदत्तीय घटघटत्वावच्छिन्न विषयक शाब्दवोधं प्रति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यज्ञदत्तीय घटत्वावच्छिन्न विषयक शाब्दवोधं प्रति यज्ञदत्तीय घटत्वा वच्छिन्न विषयकोपस्थितिपदार्थानां समोषां कारणं विज्ञेयम् विद्धदभिः।

अमुनाकारणकूटेनात्मनिष्ठप्रत्यासत्त्यासतिकार्यकारणभावे तत्पुरीष-यत्वनिवेशापेक्षया समानविशेष्यता प्रत्यासत्त्यालघीयरत्त्वं दृश्यते।

किन्तु समवायेनात्मनि यज्ञदत्ते घटत्वावच्छिन्न विषयकोपस्थितिसत्वे यटविषयकशावब्दवोधनिवारणाय विषय प्रवेशस्यौचित्यं समवलोक्यते। अतएव यटविषय शाब्दवोधं प्रति पटविषयकोयास्थितिः कारणं जायेत। इत्य तो विषय निष्ठ प्रत्यासत्त्यापेक्षया गुरुत्वापत्तिः दृश्यते।

एवं प्रकारेण मानसस्लेऽपि लौघवगौरव विचार विमर्श प्रसंगेपीत्त्थं कार्यकारण भावः ज्ञातव्यः। तथा च—

वहिनव्याप्य धूमत्वावच्छिन्नप्रकारतानिरूपितपर्वत्वावच्छिन्न विशेष्यताक ज्ञानं विनापि यत्र संयोगेन धूम प्रकारक पर्वतविशेष्यक प्रतयक्षं जातम्, तदनन्तरं वहिनव्याप्यधूम इत्याकारकं व्याप्तिस्मणं यत्र संजातम्, तादृशस्थलेज्ञानद्वयेनैवामुमितिः स्यादेव कथंतर्हिव्याप्तिविशिष्ट वैशिठस्यावगाहिज्ञानस्य नैवसर्वत्रकारणं भविष्यति परन्तु व्याप्यतावच्छेदक प्रकारक पक्षधर्मता ज्ञानत्वे नैव कारणात्वस्य स्वीकार्यतया गुरुत्वदोष समाक्रान्तत्वेन विशिष्ट ज्ञानं नैवकल्यनीयमिति चेत् सत्त्यं प्रतिभाति। तावता व्याख्यानेनापि स्वाभिप्रायस्य समाधनं कर्तुं नैव क्षमेत। व्याप्यतावच्छेदक ज्ञानविरहदशायां वह्निव्याप्य धूमवानतिज्ञानात् अनुमितिः स्यादेव किं तर्हि गुरुतरा निवेशेने व्याप्ति प्रकारक पक्षधर्मता ज्ञानत्वेन कारणत्वकल्पने नितंरालघीयस्त्वमेवेति जायान् पक्षः प्रतिमाति। एवमपि धूमवान् पर्वत इतिज्ञानादपि तावदनुमित्यापत्तिः दृष्टिगोचरायते। अनेन प्रकारेयणापि व्याप्यतावच्छेदकीभूत धूमत्वप्रकारकस्य पक्षधर्मता ज्ञानस्य वंतमानत्वत्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नचतदार्नागृहयमाण व्याप्यतावच्छेदक प्रकारकस्य पक्ष्णधर्मता ज्ञानस्य तत्र हेतुत्वमितिवाच्यम् । अन्यस्य व्याप्ति ग्रहेतद्भिन्नस्य पक्षधर्मता ज्ञानाट्नुमित्यापत्तिः।

यदिनाम तत्पुरुषीयानुमितौ तत्पुरुषीययक्षधर्मताज्ञानं कारणं भविष्यति चेत् तदानन्त कार्यकारण भावा पत्तेश्चेति विज्ञातव्यएवेति निश्चयः।

नैयायिक मतेतु-

समवाय सम्बन्धेन व्याप्तिप्रकारकपक्षधर्मताज्ञानं समवाय सम्बन्धेनानुमिर्तिप्रतिकारणमित्यतो नानन्तकार्यकारण भावः। यद्यत्र वह्निव्याप्यो धूमः आलेक वाँश्च पर्वत इति ज्ञानादप्यनुमितित्वेऽपि ज्ञान द्वये नापि लघुत्वमेव समागच्छति, तथापि विशिष्टज्ञानदशायामपि दोषा क्रान्तत्वेनापि फलमुखतया निर्दोषत्वमेव गरीयान् विचारः श्रेयस्कर एवेति।

वास्तविकंतु— वहिनव्याख्य धूमवान् पर्वत इत्यादिस्थलेनिरूपितत्व सम्बन्धेन वह्निपदार्थस्य व्याप्तिपदार्थे अन्वयः, तादृशव्याप्तिपदार्थस्य स्वरूपसम्बन्धेनाश्रये अन्वयः। तस्य च धूमे अमेदेवा न्ययः तस्यापि मतुप् प्रत्ययार्थस्य संयोगेनान्वयः। एवं भूतस्य तस्य पर्वते अमेदेनान्वमः। एकज्ञानीय समानाधिकरणप्रकारत्वविशेष्यत्वयोः अवच्छेद्यावच्छेदकभावः मट्टाचार्येण स्वीकृतः। तर्कालङ्कारेणतु अमेदएवाङ्गीकृतः। तथासति— निरुपितत्वसम्बन्धावच्छिन्नवहिनत्वावच्छिन्नप्रकारतानिरूपित व्याप्तित्वावच्छिन्नविशेष्यतातादृशविशेष्यत्वावच्छेद्याश्रयत्वावच्छिन्न प्रकारता, तादृशप्रकारतानिरूपितविशेष्यावच्छेध्याऽभेद सम्बन्धावच्छिन्नवप्रकारता निरूपित धूतमत्वावच्छिन्न विशेष्यता तादृश विशेष्यत्वावच्छेदय प्रकारता निरूपित पर्वत्वावच्छिन्न विशेष्यता शालि निश्चयस्यानुमितौ कारणं भवति परामर्श इत्येव तयोःकार्यकारणभाव सम्बन्धाङ्गीकारे नकापिक्षतिः लोचन पथेपथिकायते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समवायेन तर्द्धभावच्छिन्नलिगकानुमितिं प्रतितद्धर्भावच्छिन्न विषयक व्यापप्ति निश्चयस्य तद्धर्मावच्छिन्न प्रकारक पक्षविशेष्यक निश्चयस्य, एवं तत् प्रकारक पक्षविशेष्यकनिश्चयस्यसमवायविशिष्टसामानाधिकरण्य प्रत्यासत्त्या कारणत्वमिति कार्यकारणभावकल्यनेन मीमासकानां विचारे नास्ति दोषावकाशः व्यभिचारावसर:समुपस्थितो भवति।

नैयायिकांनां विचारेतु विभिन्नकल्यनाप्रयुक्तगौरवस्य प्रतिसन्धान् दशायांनैवपरामर्शस्यगुरुत्वेननैवसाधीयान्पक्ष:- विभाति । मीमांसक मतेऽपि हेतुतावच्छेदकधर्मविशिष्टकल्पनाजालप्रसारणेन गुरुत्वापत्तिः समागच्छत्येवेति साधीयान् विचारः समायाति।

''स्वतो ग्राह्यत्वम्''

वह्निव्याप्य धूमवान् पर्वतः 'वह्निव्याप्यालोकवान् पर्वतएवं वह्निव्याप्यवान् पर्वत इत्यादिज्ञानसाधारणकारणवैलक्षणयानुरोधने साध्यभाववन्निरूपिवृत्तित्वाभावप्रकारतानिरूपित हेतुप्रकारता निरूपित पक्षविशेष्यता शालिज्ञानत्वेनैवनिश्चयतयातत्रनोक्तविभिन्नकार्यकारण भाव कल्पना विहितगौरवदोषावहतयासुतरांविचारदोषघटितत्त्वप्रयुक्त क्लिष्टत्वमेव सम्पद्यते। सत्यमेतत् नाति चित्रं कार्य कारण भावस्येति येन प्रपकृत विषय सर्सकोमासादयेदिति।

समागतविचारझंझानातप्रावल्यसमाच्छन्नतयापि श्रीमतां पूज्ययादानां मुयाध्यायानां विचारएव प्रेयानिति परिष्ठ विदुषां विचार प्रवाहः सर्वदा भव्यप्रद इतिश्रेयन् पन्थाः विलसति।

तथापि न्यायसिद्धान्ते पक्षधर्मताविशिष्टव्याप्तिप्रतिसन्धानद्वयस्थले परामर्शविशिष्टज्ञानकल्पनाजालप्रसारप्रयुक्तगुरुत्वदोषावहत्वं भवत्येवेतिसमे श्रेयान् पन्थाः समागच्छत्येवेति ध्रुवम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतएव फलमुख गौरवस्याऽदोषत्वेन नहितेषां दोषावहत्वमिति फलश्रुतिदर्शनात्।

इत्थं च सदोपाध्यायानां श्रीमतां विचार पारावार प्रवाहे विना विशिष्टप रामशं सर्वदानुमितिः नितान्तं सदा आनुभविकी नैव कल्याणजननीजायत एवेतिनिर्विवाद सिद्धोयं यन्थाः विदुषां मण्डलेख्यातिमायाति। अतएवेत्थं चेति यत्रज्ञानद्वयंतत्रापिविशिष्टज्ञानंकल्पनीयमेवेति। फलमुख गौरवस्यादोषत्वदिति। एवं च—

समवायेनामुमितिंप्रति व्याप्तिप्रकारक ज्ञानत्वेन धूमोवह्निव्याप्य इत्याकारक विशिष्टज्ञानत्वेन धूमोववह्निव्याप्य इत्याकारक व्याप्ति प्रकारक-ज्ञानत्वेनपक्षधर्मताविषयकनिश्चयत्वेन धूमवान् पर्वत इति पक्षधर्मता ज्ञानंच समवाये न स्वतन्त्रं कारणं कल्पनीयमित्यतो नारत्त्यत्र तत्पुरुषीत्व-निवेशावसरः समुपसर्पति। अतएव मीमांसकानां [विचारवसरे गुरुत्वापत्ति दोषावसरःनापसर्पति।

परन्तुसमुल्लिखितकार्यकारण भाव कल्पने तदयेक्षया नैयायिकानां विचारे कार्यकारण भाव कल्पने नास्ति दोषावरसरः समायतेत्।

समवायेनामुमितित्वावच्छिन्नं प्रति समवामेन पक्षधर्मता ज्ञानं कारणं जा यते। इत्यतो आत्मनिष्ठप्रत्यासत्त्या कार्यकारणभावाङ्गीकारे लघुत्वमेव स्मादिति मन्ये।

नन्वत्र विशेषणविशेष्यभावव्यत्यासे कार्यकारणभावे व्याख्येयः- समवायेनानुमितित्वावच्छिन्नं प्रति समवायेन व्याप्तिप्रकारक ज्ञानं कारणं विद्यते। एवं पक्षधर्मताज्ञानमपि कारणं कल्पनीयमित्यतो गौरवाभत्ति दोषस्तु नाव लोक्यते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनेन कार्यकारण भाव कल्पनेन नावकाश; दोषस्येति विज्ञायते। एवं तादृश विशेषणविशेष्य भावव्यत्यासेन व्याप्तिप्रकारक पक्षधर्मता ज्ञानं रवेन पक्षधर्मताविषयक व्याप्तिप्रकारकत्वेन परामर्शस्यकारणं कल्पनेन कारण द्वयस्य स्वीकार्यतया नैव गौरवावकाशः दृष्टियथे समम्पुपैति। तथा च पूर्वोक्त कल्पनेनापि एतदयेक्षायां मीमांसक कार्यकारण भाव चतुष्टयं कल्पनापेक्षया विशेषण विशेष्यभावव्यत्यास प्रयुक्त कार्यकारण भावद्वयं कल्पना प्रयुक्ततया सुतरां लघुत्वमेव वरीवर्तीत्यो नितान्तं लघीयः। न्यायसिद्धान्त विचारमनुसृत्य तथाकल्पनेन नावकाशः गौरवस्य। येताहि व्याप्तिप्रकारता निरूपित हेतुप्रकारतानिरुपितपअविशेष्यताशालिनिश्चयत्वेन, पक्षविशेष्यता निरूपित हेतुप्रकारता निरुपति व्याप्तिप्रकारता शालि निश्चयत्वेति पक्षं स्वीकुरुते । एवं-

हेतुप्रकारता निरूपितपक्षविशेष्यताशालिनिश्चयत्वेनरूपेण कार्यकारण-भावविभिन्नकल्पनेनन्यायाङ्गीकृतकार्यकारण भावे नितरांलघुत्वमेवेत्यतो नास्तिदोषावकाशः।

एंव रीत्या वह्निव्याप्योधूम तथाऽऽलोकवांश्च पर्वत इत्याकारक ज्ञानापिअनुमित्यापत्तिः।

ततः यत्र ज्ञानद्वयं तत्रापि विशिष्टं ज्ञानं कल्पनीय मित्यतो नास्ति गुरुत्वापत्तिदोषःसमभ्यु पैति।

तदनन्तरं यत्र ज्ञान द्वयं तत्रापि विशिष्टज्ञानंकल्पनीयंजायते तेन नावकाशः दोषस्य कथं फलमुखत्वात्।

अन्येषां विचारेतु–

व्याप्यतावच्छेदकप्रकारकपक्षविशेष्यकनिश्चयत्वेनयक्षविशेष्यक

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्याप्यताव्चछेदकप्रकारकनिश्चयत्वेनवाकारणत्वमत्र विभिगमनाखिरहेण मीमांसकविचारेविभिन्नकार्यकारणभावापत्त्यागुरुत्वापत्तिदोषस्यध्रौव्यमेवेति निश्चयंप्रत्येमि।

न्यायमतेतु विनिगमनाविरहमाकलय्य कारणतायद्वयोपादानं वास्तविकरुपेणानुचितमेनेनेति सत्यंप्रतिभाति, तथापि व्याप्तिप्रकारत्व हेतुप्रकारत्वपक्षविशेष्यत्वानांसमेषांत्रयाणांविशेष्यविशेषणभावेविनिगमना-विरहेण गुरुभूतकार्यकारणभावत्रयापत्त्या तेषांविचारे नावकाश: गौरवस्येति वोध्यम्।

न्यायनयेतु व्याप्ति प्रकारता निरुपित हेतुप्रकारतानिरूपित पक्षविशेष्यता शालि ज्ञानत्वेन हेतुत्वस्य प्रतिपादनात् । अत: तादृशज्ञानात् नवा धूमो वह्नि व्याप्यो धूमवान् पर्वत इत्याकारक ज्ञानादनुमित्यापत्ति:। किन्त्वन्येषा विचारे- व्याप्ति प्रकारता निरूपित धूमनिष्ठ विशेष्यताया: पर्वत विशेष्यता निरूपित प्रकारतानात्मकत्वेन नावकाश पूर्वोक्तानाम् । किन्त्वत्र ज्ञान द्वयं यत्र विद्यते तत्र विशिष्ट ज्ञानस्य कल्पना प्रयुक्त गौरवस्यनास्ति दोषावहत्वं भविष्यतीति समीक्ष्य यत्- कार्यकारण भावग्रहस्य फल मुखत्वेन नावकाश: गुरुत्वायत्ते:। विशिष्ट ज्ञात्वावच्छेदेन कारणत्व ज्ञानेऽपि विशिष्टज्ञानत्व धर्मिक गौरव निश्चस्य विरोधित्वमेवापतेत्।

तच्च प्रमाणान्तरासिद्धानुमित्यव्यवहित पूर्ववर्त्ति स्वाश्रयकत्वमेवाव-गन्तव्यम्।

तथा च–

विशिष्टज्ञानत्वेनतादृशगौरव निश्चयस्य कारण निश्चयाधीनमस्त्येवे तितेयां निश्चयोस्ति। एतावता विज्ञानअनुमिति स्वघटकी भतेदनुत्यतिवहिपूर्व स्वाश्रयनिणयं विना नैव संभवति, इत्यतो कार्यकारण निश्चयात् प्राक गुरुत्वा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भाव निर्णयाभावानैव तादृश गौरवस्य दोषावहत्वमिति।

भट्टाचार्याणां विचारेतु व्याप्तिप्रकारतानिरूपित विशेष्यत्वावच्छिन्न प्रकारतानिरूपितपक्षविशेष्यताशालिनिश्चयत्वेनैव वक्तव्यमितितात्पर्य-मगन्तव्यम्। एकनिष्ठप्रकारत्व विशेष्यत्वयोरवच्छेद्यावच्छेदक भाव स्वीकारादिति तात्पर्यभवगन्तव्यम्।

अन्येषां विचारे च विशेष्यत्वप्रकारत्वयोरभेदाङ्गीकारेतुरक्तदण्डवानिति बुद्धौ रक्तरूप विशेष्यक दण्डाभाव निश्चयस्य प्रतिबन्ध्यत्वा पत्तेः।

दण्ड प्रकारतानिरूपित रक्तनिष्ठविशेष्यता शालिनिश्चयलेनतथाविध-त्वमेवाङ्गीकर्तव्यमेवेति निश्चितम् । अथच परिस्थित्यामस्यां समावायेन तद्धर्मावच्छिन्न लिंगकानुमितिं प्रति तद्धर्मावच्छिन्न विषयक व्याप्ति निश्चयत्वावच्छिनंसत् तद्धर्मावच्छिनिलिंगकानुमितिं प्रति तद्धर्मावच्छिन्न-विषयक व्याप्ति निश्चयत्वावच्छिन्न तद्धर्मावच्छिन्न प्रकारकपक्षविशेष्यक निश्चयत्वावच्छिन्नस्य च समवाय घटित सामानाधिकरण्य प्रत्यासत्त्याकारणत्वमितिकार्यकारण भाव कल्पनेन मीमांसकानांभते नास्ति व्यभिचारावसरः समुपसर्पति। न्यायसिद्धान्तविचारसारं समुपकल्प परामर्शस्य कल्पना जाल प्रसारेण विविधकल्पनाजाल प्रसारणे विविध कार्यकारण भावतया गुरुत्वायत्तिमिया नैककारणत्वं स्वीकार्यं परामर्शस्येति मन्तष्यम्। परन्तु तन्नभद्रकरम्। कथंतु मीमांसक विचारे—

हेतुतावच्छेदक भेदेन अनन्तकार्यकारणभावयत्तेः, दुर्वारत्वात् नव्यनैमा यिकानां विचारे वह्निव्याण धूमवाम् पर्वतः। वहिनव्याप्य आलोकवान्यर्वतः'' वह्नि व्याप्यवान् पर्वत इत्याकारकादि साधारण कारणनुरोधेन साध्याभाववन्नि रूपित वृत्तित्वाभाववन्निरूपित वृत्तित्वाभाव प्रकारता निरूपित हेतुप्रकारता निरूपितयक्षविशेष्यता शालिनिश्चयत्वेन कारणत्वस्य निश्चयात्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नोक्तकार्यकारणभावकल्यप्रयुक्त गोरवत्वदोष: लोचनपथे याथिकायते।

नन्वथायिन्यायसिदधान्तानु सारेण तादृश कार्यकारणभावानुरोधेन च गुरुत्वमायाद्यते। तथाहि—

समवोयन तद्धर्भावच्छिन्नलिंगकानुमिर्तिप्रति तद्धर्माच्छिन्न विषयक व्याप्तिनिश्चयस्यतद्धर्मावच्छिन्नप्रकारकपक्षविशेष्यककारणत्वेन कार्यकारण-भावस्यस्वीकार्यतया मीमांसकामंत विचारे नैव व्यभिचारावसर: समागच्छेत्।

न्यायमतेषड्विध कार्यकारणभावेन तत्कल्यनेनेन च गुरुत्वं समापतेदिति नाशङ्कनीयं केनापि। मीमांसककल्यित कार्यकारणभावकल्पने हेतुतावच्छेदक-मेदेनानन्त कार्यकारण भावापत्ते:दुर्वारत्वात्।

व्याप्तिस्मरणपक्षधर्मताज्ञानद्वयस्थले परामर्श विशिष्ट ज्ञान कल्पित गौरवदोषावहत्वेन तथात्वापत्ते:। फल विशिष्ट गौरवस्याऽदोषत्वादिति तर्कसझतमेवेति गरीयान् विचारावसर: तर्क सम्मत मेवेति प्राकाण्ड विदुषां विचारसरणि:। एवं च—

विशिष्टज्ञानत्वेनकारण दशायां निश्चितकारणत्वाऽन्यन्त्रानुपयत्त्याज्ञानद्व-याव्यवहितजायमानामुमिते: प्राक्विशिष्टज्ञानंकल्पनीयमेवेत्यतो गौरवाक्रान्ततयापि कार्यकारणभावनिश्चयत्वत्, पूर्वं गौरवस्यासमवहितत्वे-नतदुत्तर कालप्राप्त गुरुत्वस्थ तादृश प्रतिबन्धकत्वस्यऽसम्भवतयातादृश-गौरवस्य नास्ति दोषात्व मितिसर्वसम्मतमेवेति साद्यीयान्पक्ष:प्रतिभाति।

हेतुनाऽमुना प्रतियाद्यते विदुषायत्- साध्यताविशिष्टावच्छेदकता-विशिष्ट प्रतियोगिता कमेदवत्त्वम् । साध्यता वैशिष्ट्यं च- स्वनिरूपितावच्छेद दकताविशिष्टान्याव्चछेदकत्वानिरूपितत्त्वसम्बन्धेन। अवच्छेदकता वैशिष्स्यं च- स्वावच्छेदक सम्बन्धावच्छिन्नत्व, सामानाधिकरण्य स्वानव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वच्छेदकानवच्छिन्नत्व, स्ववृत्तित्वैतच्चतुष्य सम्बन्धेन। तथा वच्छेदकता वैशिषस्यं च तादृश प्रतियोगितायां च- स्वनिरूपितत्त्व, स्वान्यावच्छेदकता निरूयित्वसम्बन्धेन।

स्वरूपत:घटत्वविशिष्टस्य विषयितासम्बन्धेनसाध्यत्वे ताज्ज्ञानत्वस्य साधयत्वेस्वरूपत एव घटत्व निषष्ठाच्छेदक तानिरूपितावच्छेदक ताकप्रतियोगिताकभेदंचाङ्गीकृत्यतत्राव्याप्ति: सुनिश्चिताविद्यते। अत: तन्निरासायस्वसामानाधिकरण्य प्रवेश:। पुनस्तत्रैव सम्यक् तद्विशिष्ट मादायाव्याप्तिनिरासाय स्वानवच्छेदकानवच्छिन्नत्व प्रवेशस्योपयोगित्वं वर्तत एवैति निश्चयं मन्ये।

घटत्वत्वेन घटत्वविशिष्टस्यविषयितासम्बन्धेन तज्ज्ञानस्य हेतुत्वे स्वरूपतो तद्विशिष्ट मेदवारणाय स्वानवच्छेदकानवच्छिन्नत्व प्रवेशास्यैचित्यं प्रवदन्तिवृद्धा:। पुनश्च तत्रैव तादृशविशिष्टस्य विषयिता सम्बन्धेन साध्यत्वे तज्ज्ञानत्व हेतौ स्वरूपतया घटत्वविशिष्टवदभेदभादायाव्याप्तिनिरासाय स्ववृत्तित्वप्रवेशं समवलोक्यते । वह्निमान् धूमादित्यादौ विषयिता सम्बन्धेन वह्निविशिष्टवदन्यत्वभादायाव्याप्तिवारणाय स्वाचच्छेदकसम्बन्धा-वच्छिन्नत्वप्रवेश:। नितारां नितान्तं तादृशौचित्यसमाच्छन्नत्वेन तत्रोक्त प्रवेश: वास्तविक रूपेण गरीयान् विचार: प्रतिभाति।

एतावता पूर्वापरग्रन्थ सन्दर्भ सौन्दर्येण विज्ञायते यत् एकज्ञानीय समानाधिकरण प्रकारविशेष्यत्वयो: क्वचिद् अवच्छेद्यावच्छेदक भाव:, क्वचिदमेदो वेति। तन्न मट्टाचार्याणां विचारे प्रकारत्वविशेष्यत्व-योस्तथाऽवच्छेद्यावच्छेदक भावं चाङ्गीकृत्यशाब्दोधं स्वीकुरुते।

तर्कालंकाराणां विचारेसमानाधिकरण प्रकारविशेष्यत्वयोएवेति स्वीकुरुते। वह्निव्याप्यधूमवान् पर्वत इत्यत्र निरूपितत्वसम्बन्धावच्छिन्न

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वह्नित्वावच्छिन्न प्रकारतानिरूपित विशेष्यत्वावच्छेद्यव्याप्यत्वावच्छिन्न प्रकारतानिरूपितविशेष्यत्वावच्छेष्य धूमत्वावच्छिन्न प्रकारता निरूपित पर्वतनिष्ठ विशेष्यता शालिनिश्चयस्यपरामर्शस्यतादृशानुमितिं प्रतिकारणमिति विज्ञेयम्।

तद्भिन्नानां तावदाचार्याणां पक्षे कार्यकारण भावस्तित्त्थं विज्ञातव्य: विदुषां प्रवरेण। तथाच- संयोगसम्बन्धावच्छिन्न वह्नित्वावच्छिन्न प्रकारतानिरूपति विशेष्यत्वाभिन्न व्याप्यत्वावच्छिन्न प्रकारता तादृश प्रकारता निरूयित विशेष्यतावान् पर्वत इत्याकारकसालिनिश्चयस्य कारणत्वमिति कार्यकारणभावस्य, वह्नित्ववच्छिन्न प्रकारतानिरूपित विशेष्यताशालि निश्चयस्य वह्निमान् पर्वत इत्याकारकानुमितिं प्रति कारणं विद्यते। एतादृश कार्यकारणभावस्य सर्वकारणत्वमस्तीति निर्विवादसत्यमस्तीति।

अतएव प्रत्तात्वस्य संशयानुपपत्त्या स्वतोग्राह्यत्वं विद्यते नवेति विचारा वसरे ग्रन्थकारेणाम्यधायि सत्—

प्रमात्वं न स्वतोग्राह्यं संशयानुपयत्तित:। इत्यादि वचन प्रामाण्यात् मीमांसकविचारपक्षं समालोच्यानभ्यास दशायां प्राथम्पेन संशयानन्तरं कस्यायि विषयस्य निर्णयंविधत्ते। दूरावलोकनानन्तरं प्रथमंशयात्मकं ज्ञानं विधत्ते यत् निश्चयपूर्वकाले अभ्यासदशांया कस्मिन्नविविषये जलज्ञानं वर्ततेनवेति ज्ञानस्यानिश्चयात् प्राथम्येन नहि क्वचिदयि कस्याप्यवस्थायां निश्चयात्मकं ज्ञान विधातुं क्षमते कोपि जन:। अतएव संशयग्रस्तत्वेन नहिकोपि निश्चयात्मकं ज्ञानं विधातुं क्षतमे जन:।

अनुमाकार्यकारणवैचित्र्येण गुरुमिश्र महोदयानां त्रयाणां विचारे प्रभात्वस्य स्वतोग्रह्यत्वमेवास्ते । नहितत्र प्रमाणान्तरत्वं कस्यामय्यवस्थायां तावदपेक्षते प्रमाणवचनम् । ते महोदया: गुरुमिश्र मीमांसाका सिद्धान्ते

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धुरीणाः प्रभाकरमिश्रकुरिलाचार्यद्याः सर्वदा सर्वथा विचारयक्षमाच्छेत्तुं प्रतियलं बद्धपरिकरा एवलोचनयथेयथिकायन्तेतरामिति निर्विवाद सत्यमेतत्।

"त्रिषु मीमासकेषु" ते पूज्यचरणाः प्रमात्वं ज्ञानवृत्तित्वविशिष्टं तद् वतितत्प्रकारकत्वम्। स्वतोग्राहयंनाम तद प्रामाण्याग्राहकज्ञानग्राहक यावत् सामग्री ग्रहजन्य ज्ञानविषय एव।

त्रिषु मीमांसकेषु विचार ग्रहग्रस्तेषु पूर्वाग्रहस्तेषुच समेषां ज्ञानानां स्वप्रकाश रूपात्मक तया स्वाभिन्न ज्ञानषिषत्वस्य सर्वदानश्यकत्वेन ज्ञानस्य तत्प्रभात्वस्य ज्ञानभिन्न ज्ञानविषयत्वस्य सर्वदानश्यकत्वेन ज्ञानस्य तत्प्रमात्वस्य ज्ञानभिन्नज्ञानग्राहकतया तज्ज्ञानसम्पादनाय पुनरपिज्ञानोत्तरापेक्षत्वे सुतरामित्यतोनितान्तमनवस्थापत्तेः।

अतएव प्रातःस्मरणीयपादाः सर्वशास्त्रविहरणपरायणपञ्चाननाः गौतमकल्पपादाः परमपूज्याः श्रीमन्तः धर्मदत्तोपाध्यायाः गुरुवरशिरोमणयः तादित्थं प्रत्ययीयदन् यत्—

यत्रानवरथादुस्थतर्कनिवर्त्यव्यभिचारशङ्कावरुद्धोत्पत्तिकव्याप्तिग्रह सत्त्वानुमितिरुपफलानुत्पत्त्याप्रामाण्यानुमानस्य मन्यन्ते परे तावदाचार्याः- तावदित्थमपि परसत्त्वोपत्तिग्रहानुकूलत्वेनयत्रकुत्रापि प्रामाण्यं सदासमैः अमन्यत वृत्तित्वविशिष्टंतु तद् विशेष्यकत्वेसति तादृशावच्छिन्न प्रकारकत्वात्मक प्रामाण्यमित्त्यवगभ्यते समैः।

अन्यथा प्रपूर्वकमा धातोः ल्युटि ततःरथ ञिततःसमान्यमस्य प्रभाकरणत्वस्य तथात्वेपक्षत्वापत्तिः। अतः तं परित्याज्य प्रपूर्वक माधातोः भावे ल्युटिनिष्पन्नोयं प्रमाणशब्दः विज्ञायते तत्त्वविदा। तेन प्रामाण्यस्य प्रमात्वमर्थः। तस्यैव यक्षत्वमिति ज्ञायते तार्किकचणैः। तत्रैव तात्यर्यं ग्रहार्नां ज्ञानपदमितिवोधव्यं विद्वद्भिः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रयाणां मीमांसकानं समालोचनेविज्ञायते खलु-

व्याप्यतावच्छेदक प्रकारक पक्षयर्मताज्ञानस्यानुमितिहेतुत्व मेवावेमि निर्विवाद्सत्त्यमास्त्येवेति । तथाच कपिसंयोगव्याप्यत्वं कपि विभास्य संयोग मूलवच्छिन्निवृक्षः'' ज्ञानद्वयस्य प्रमात्मकतया मूलावच्छिन्नोवृक्षः कपिसंयोगी विद्यत इत्यादि प्रतीतेः प्रामाण्यतया कपिसंयोगीत्यनुमितेरावश्यवकत्ववशादेवान्यथख्यातिसिद्धेर्निष्यत्यूहत्वात्।

रंगंरजततयाऽवेदिषम्- इत्यनुव्यवसायप्रावल्यतया रजतत्व प्रकारकत्वस्य विशिष्टबुद्धेः तत्स्वरूपत्वेवसेयम्। तत्र रजतत्व प्रकारकत्वाऽसंसर्गाग्रहरूपमेव विज्ञायते केनापि। तथाच कपिसंयोगाऽसंसगग्रहाभाव-रूपानुमितिरेव। तथा नैवान्यथाख्याति पदार्थसिद्धिः। तन्न चारु, मानसे तथाऽनुल्लेखात्। तदनङ्गीकारे सकलतन्त्र विरोधापत्तेः।

तादृशानुव्यवसायानुरोधेन ज्ञानलक्षणापि स्वीकरणीयेवेति। अतएवाऽन्यथाख्याति निष्प्रत्यूहेति सुविचार्य मूले ग्रन्थकारः यत्-

इत्त्थंचान्यथाख्यातौ प्रत्यक्षमेव प्रमाणम् । तथा रङ्गं रजततया अवेदिषमित्यनुभषात् । अधिकं मण्यादौ द्रष्टव्येवेति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गीर्वाणगवीजुषां भवतां भवतां विपक्ष पक्षक्षोदक्षमां कामपि प्रमाणपल्लव विलास चतुरां कामयमानां युक्तिमभिनवांनाभिवीक्ष्य परपक्ष समन्यर्हित प्रामाण्यं स्वतो ग्राह्यं संशयाऽनुपपत्त्या नैव मनोभिरामं वचनं वरीवृतीत्यतो परतो ग्राह्यं भवेदि सत्यंप्रतिमाति। तमेव पक्षमाकल्य्यः सदानुभानाभ्यां सुसम्मततया प्रभात्वस्य परत्वग्राह्यभेवेति व्याचचक्षिरे मिश्राः निवारितितमिस्त्राः स्वकीयं मनोमिरामं सहृदयहृदयाहलादकं वचनं प्रसादासदनं वेदादिलसितं परस्सहस्त्रविद्वत्वकदम्बभूषितंसर्वदा प्रत्यपीपदन्।

न्यायात्मकस्य विषयस्य सदावगाहं-,
कृत्वा सदा विविध पक्षमिमं प्रवक्तुम् ।
यत्नेन किं कथमपीति फलं विचेतुं-
शक्ष्ये शतैरपि च शास्त्र विधानमेव ।।१।।

ईहे तथापि परिशुद्ध विचारवेषं-,
शेषं विधाय परिचिन्तन कीर्तनं वै ।
सम्पूर्णशास्त्र निञ्चयामृत पानमेवं-,
सम्पाद्य यत्नमपरेण सदावभूव ।।२।।

किंवा प्रभात्वविपुलं किल तावकीनं-,
न्यायादिदर्शनप्रभायशसा विशिष्टम् ।
प्रामाण्यवादपरिशुद्धविवुद्धतत्त्वं-
श्रीगौतमादिमुनिचिन्तन शुद्धरूपम् ।।३।।

गंगेश गौरव सुधासुपरागरम्यं-
पानं विधायसकलं सुविचार शास्त्रम् ।
युक्त्या विचार परिसम्मत भाव वेषं-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्याख्याय शास्त्र परिचिन्तन सुन्दरेण ।।४।।

गंगेशरम्य कलितेन सयुक्तिकेन-
वेदार्थरम्य परिचिन्तन मासितेन ।
विद्याकला सुललितेन सुरम्यकेन-
विद्योतते सततमध्य प्रमाणवादः ।।५।।

मीमांसकस्य परिरम्य विचारवेषं-
चित्ते विधाय सततं सुखशाल्ल भावैः ।
तत्त्वात्मकोद्भव कला कलिताम्बु पानैः ।।६।।

न्यायादिसम्मत विशिष्टभतं चकार ।
गंगेश गौतम विशिष्ट कृतस्वभावम्-
वेदादिनिर्गतसुशान्तसदा सुगीतम् ।
तर्कादिरम्य सुविचार दिशाप्रबन्धं-
स्वान्तः सुखाय सततं नितरां चकार ।।७।।

सिद्धान्त कौतुक कथाकमनीय भावं-
सम्पाद्य शास्त्ररमणीयकला कलापैः ।
प्रामाण्यवाद रमणीय सुगम्यवोधैः-
शान्त्यादि शुद्ध परिभूषित युक्तिवादैः ।
योगस्यः वैभवस्य चरिताम्बुमुदा विशिष्टैः,
रम्यैः व्यधायि सततं सप्रमाणतत्त्वैः ।।८।।
युत्यातथात्वमधुना किल तावकीनं-
वेदादि संमतंमुदाः तदुयासनीयम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पक्षान्तरस्य प्रतिपादनमेव रम्यं-
रम्यं विधाय विमलं परिच्छिध्य युक्त्या ।
गाथा विलास परिहास प्रमाण वाक्यं-
सौदामिनीव सततं विमलं चकार ।।९।।

सम्यक् विचिन्त्य सुतरांहि प्रमात्ववादं-
सिद्धान्त शास्त्र रमणीय विचार शोभम् ।
भावार्थ तत्त्व निवहोद्वहते स्वतन्त्रैः,
व्याख्याय कौतुक मयं त्वरितं यसोभूत् ।।१०।।

शंका शिलाललित रम्य कथा विशेषं-
कृत्वा विशेषकमनीय गुणानुरूपयम् ।
तनोतिपक्षव्यतिरिक्तमिदं विशिष्टं-
प्रोवाच न्याय परिलक्षित शिष्ट मिश्रः ।।११।।

ज्ञान द्वयं भवति यत्र तदेव वाच्यं-
व्याप्ति प्रकारकृत गौरव ज्ञानमेव ।
सिद्धान्त गौरवकथाचतदा विशिष्टैः-
शिष्टैः सदा भवति तत्र प्रभात्ववादः ।।१२।।

शंका शिला मयुररम्य विचित्रख्यातिः,
संगीयते च विदुषा भवताऽऽदरेण ।
सिद्धान्त गीत परिलक्षितभाववेषं-
निर्माय कौतुक कथाकमनीयरम्यम् ।।१३।।

।। इति शुभम् ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रग्भाकरस्य रजते किमिदं विचित्रं
भेदाग्रहस्य कलितं किल तावकीनम् ।
रंगे तथा रजत बुद्धि विलास चेष्टा-
स्वप्नेऽपि किंचभवतां भवतां विचित्रम् ।।१४।।

प्रामाण्य मेद सलिलाम्बु प्रभा प्रवाहे-
स्वातन्त्र्य जात परिहास विभा विलासैः ।
वैशिक सम्मत सुधाकमनीय रम्यैः-
केनापाय भवलम्ब्यच ते गदन्ति ।।१५।।

इत्त्थं विचिन्त्य सततं निगदन्ति सर्वे-
विदित- ते किं मुदा गौरवसादरेण ।
प्रामाण्यपक्षमवलम्व्य विचार वेषं-
वेदागमानुलसितं किल तर्क भेव।।१६।।

नित्यं सदा सुललितं तव वाग् विलासं-
मानापनोदन विनोद विवेक शून्यम् ।
दृष्ट्वामनो यदिचनास्ति विचार गाथां-
व्रूते कथं तवकदापिविचित्रवार्ताम् ।।१७।।

"स्वतस्त्वम्"

।। समाप्तिः ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



जन्म मिति : १८.९.१९४३ ई.

पिता : श्री जयकान्त चौधरी

ठेगाना : जि. महोत्तरी, बनौलि गा.वि.स.बख्ना-४

शैक्षिक योग्यता :

क. आचार्य न्याय विषय कमेश्वर सिंह संस्कृत विश्वविद्यालय दरभंगा : १९६४ ई.

ख. पुरक आचार्य न्याय विषय त्रि.वि.वि. १९६८ ई.

(P.H.D) विद्यावारिधि (म.सं.वि.) आत्मतत्व विश्लेषण

पद : प्राध्यापक म.सं.वि.

अन्तर्गत हजारी जनक विद्यापीठ, जनकपुरधाम

पदक :

क. शिक्षा दिवश पुरस्कार २०४५ वि.सं.

ख. दिर्घकालिन सेवा पदक २०६५ वि.सं.

ग. महेन्द्र विद्याभूषण पदक प्रथमक श्रेणी २०५० वि.सं.

घ. विश्वविद्यालय वाट दीर्घ सेवा पदक २०५७ वि.सं.

ङ. मिथिला सांस्कृतिक केन्द्र महोत्तरी वाट सम्मान पत्र २०६२

च. उपकुलपति माधवराज गौतम वा धन्यवाद ग्यापन पत्र २०४५

छ. संस्कृत सम्मेलन एवं कार्यशाला वाट प्रमाण पत्र प्राप्त २०४२

अनुभव : प्राग्यिक परिषद सदस्या २०४४ भाद्र १८ देखि नियमित

प्रकाशक :

चौखम्बा संस्कृत पुस्तकालय

सी.के. २८/१५, ज्ञानवापी-चौक, वाराणसी - २२१००१

Ph. 0542-2401170

cspustakalaya@yahoo.com

Chaukhamba Sanskrit Pustakalaya

Jayatu Sanskritam, Kathmandu, Nepal